# काव्योद्यानम्

(काव्यनाटकसङ्ग्रहः)

# KĀVYODYĀNAM

***(Collection of Poems & Plays)***


ग्रन्थकर्ता

महामहोपाध्यायः एन्. रङ्गनाथशर्मा

Author

**Mahamahopadhyaya N. Ranganatha Sharma**



प्रकाशकः

ग्रन्थकर्ता

# काव्योद्यानम्

## (काव्यनाटकसङ्ग्रहः)

## KĀVYODYĀNAM

*(Collection of Poems & Plays)*


ग्रन्थकर्ता

**महामहोपाध्यायः एन्. रङ्गनाथशर्मा**

Author

**Mahamahopadhyaya N. Ranganatha Sharma**



प्रकाशकः

**ग्रन्थकर्ता**

*Kāvyodyānam*, is a collection of original Sanskrit compositions by Prof. N. Ranganatha Sharma, Published by the author.

Editorial Assistance : Dr. S.R. Leela

Pages : xii + 132

© Author

Year of Publication : 2009

करतलकलितानां फुल्लमल्लीसुमानां
प्रणवमहितनाम्नां स्वच्छमुक्तासमानाम् ।
उपहृतिभिरुपास्यं शम्भुमभ्यर्चयन्तं
भसितलसितभालं सद्गुरुं स्तौमि नित्यम् ॥

**This book is Printed with the financial assistance provided by Rashtriya Sanskrit Samsthan, New-Delhi.**

Printed at : Vagartha, Bangalore.

# विषयानुक्रमणिका


| | | |
|---|---|---|
| | निवेदनम् | v |
| | Foreword | vii |
| | Author - Prof. N. Ranganatha Sharma | ix |
| | Kavyodyanam | xi |

**नान्दी**

| | | |
|---|---|---|
| १. | वाग्देवतास्तुतिः | 2 |
| २. | गीर्वाणवाणीप्रशस्तिः | 2 |
| ३. | श्रीशारदापञ्चकम् | 3 |

**प्रकीर्णपद्यानि**

| | | |
|---|---|---|
| १. | वीरोत्तेजनम् | 6 |
| २. | भावैकता | 9 |
| ३. | श्रीशृङ्गेरीसद्विद्यामहापाठशालायाः............. | 10 |
| ४. | मुक्तकानि | 11 |
| ५. | कर्णाटकविधानपरिषत्सदस्यस्य......... | 13 |
| ६. | श्रीमातृस्तुतिः | 14 |
| ७. | मनोबोधः | 16 |
| ८. | श्रीगोम्मटेश्वरपञ्चरत्नम् | 20 |
| ९. | राष्ट्रदेवो भव | 21 |
| १०. | ज्योतिर्वितानम् | 21 |
| ११. | श्रीकृष्णः | 22 |
| १२. | समस्यापूर्तिः | 23 |
| १३. | श्रीरामायणम् | 26 |
| १४. | चैत्रोत्सवः | 27 |
| १५. | वसन्त ऋतुः | 28 |
| १६. | वर्षाकालः | 29 |

## सुप्रभातस्तोत्राणि

१. श्रीरामचन्द्रसुप्रभातम् 31
२. श्रीसुब्रह्मण्यसुप्रभातम् 34
३. श्रीगोम्मटेश्वरसुप्रभातम् 39

## स्तुतिपद्यानि

१. श्रीशङ्करभगवत्पादस्तुतिः 47
२. श्रीश्रीधरस्वामिभ्योऽर्पिता स्तुतिपुष्पमाला 50
३. श्रीगुरुस्तुतिसप्तकम् 52
१. श्रीविद्यारण्यस्तुतिः 54

## रूपकाणि

१. श्रीबाहुबलिविजयम् 57
२. एकचक्रम् 92

श्रीशङ्करचरितामृतम् 110

# निवेदनम्

मदीयजन्मग्रामे यक्षगानप्रसङ्गा आभीक्ष्ण्येन भवन्ति स्म । यक्षगानपद्यानि श्रावं श्रावं ममापि बाल्य एव कन्नडपद्य-रचनायामीषद् व्यसनमुदभूत् । प्राथमिकशालायां छात्रः सन् किमपि निमित्तीकृत्य पद्यं रचयन् मित्राणि रञ्जयन् आसम् । ततः परं संस्कृतमभ्यसितुकामः ग्रामान्तरे विद्यमानां संस्कृत-पाठशालां प्रविष्टः । तत्र अभ्यस्यतो मम द्वितीयवर्ष एव संस्कृतश्लोकरचनायां कौतुकं हास्यास्पदमङ्कुरितम् । तत्र प्रवृत्त-स्यापि मे यत्नः फलं नासूतेति न पुनर्वक्तव्यम् । तस्यां पाठशालायामभ्यस्यता मया संस्कृतकाव्यपरीक्षा समुत्तीर्णा ।

ततः परं प्रौढव्यासङ्गं चिकीर्षुरहं बेङ्गलूरुनगरमागत्य श्रीचामराजेन्द्रसंस्कृतमहापाठशालायाः साहित्यकक्ष्यायां प्रवेश-मलभे । तत्र अधीयानेन मया कदाचित् । ग्रामान्तरपाठ-शालाध्यक्षेभ्यः, येषां पूज्यं पादमूलमाश्रित्य मया राम-शब्दोऽधीतः काव्यपरीक्षा च उत्तीर्णा, तेभ्यः श्रीनारायणशास्त्रि-महोदयेभ्यः संस्कृतश्लोकमयं पत्रमेकमलिखम् । पत्रस्थः प्रथमः श्लोकोऽद्य स्मर्यते यथा -

पत्रमूल्यमपि दातुमक्षमः
पत्रमेकमपि नालिखं गुरो ।
मित्रदत्तमिदमाणकं ततः
पत्रमेतदधुना विलिख्यते ॥

ततः क्रमेण यथा यथा काव्यालङ्कारच्छन्दांसि व्याकरण-शास्त्रञ्च अधीतानि तथा तथा संस्कृतश्लोकरचनायां किञ्चिदुत्कर्षः

समपद्यतेति सम्भाव्यते । कदाचिन्ममप्रियमित्रेण श्रीमाध्वमतस्थेन प्रसङ्गानुप्रसङ्गात् मामुद्दिश्य-

स्मार्तानाञ्च स्मरार्तानामद्यैवेकादशी सखे !

इत्यभिहितम् । मया च द्वितीयक्षण एव -

दुरध्वानान्तु माध्वानां श्वः एकादशी सखे,

इति प्रत्यभिहितम् । ततो द्वाभ्यामपि हसितम् ।

एवं गच्छति काले विविधप्रसङ्गेषु बन्धुमित्रादिभ्यः प्रेष्यमाणाः शुभाशयाः, तथा सन्तापसन्देशाश्च प्रायः श्लोकरूपेणैव व्यरच्यन्त । संस्कृतभाषायां प्रवृत्ताष्टावधानकार्यक्रमेषु पृच्छकेन सता मया श्लोकरूपेण समस्या अपि विरचिताः ।

एवं सम्पादितासु कवितालतासु काश्चन सञ्चित्य काव्योद्यानमिदं भूषितम् । अत्र विकसितानि सुमानि सुगन्धीनि वा, उताहो कुत्सितानि कुसुमानि वा इत्यस्मिन् विषये सहृदया एव प्रमाणम् । मम सहोदरीसदृशाया संस्कृत विदुष्या डा॥ एस्.आर्. लीला नामधेयया महाभागया कर्नाटकराज्ये विधानपरिषत् सदस्यया, एम्.एल्.सि. पदवीजुषा अस्य ग्रन्थस्य प्रकटनकार्ये सर्वोऽपि भारो निरूढः । उपकारमिमं कृतज्ञतया स्मरामि । नवदेहलीस्थया संस्कृतसंस्थानेन च कृपया मुद्रणार्थं धनसाहय्यं प्रदत्तमिति संस्थानस्य औदार्यं कृतज्ञतया स्मरन् संस्थानाय भूयांसि नमांसि समर्पयामि । इति विद्वज्जनविधेयः ।

१०-०१-२००९ एन्. रङ्गनाथशर्मा

बेङ्गलूरु नगरम्

# Foreword

It is a great moment of fulfillment for me to see *Kavyodyana* published. Because this small collection is like a treasure full of superior gems. Here we have *Muktakas*, *Samasyapurti* verses, devotional poems like *Suprabhatam* to various gods, short poems and playlets.

The poet *Mahamahopadhyaya* N. Ranganatha Sharma is a renowned scholar in *vyakarana shastra* who has guided the speak samskrit movement that took its origin in Karnataka.

Sri Ranganatha Sharma's rendering of Ramayana is the most authentic and beautiful translation even today. Though many translations and abridged versions of the Ramayana have come up the one given by our vyakarana Prof. remains the best work both for its accurate translation and chaste style. The spirit of the original flow and force is reflected in the kannada rendering making it the most readable and popular kannada version of Valmiki Ramayana.

As a pandit in the Kannada Sahitya Parishad, Bangalore, he edited a number of kannada manuscripts of great value.

At the advanced age of 92 Prof. Sharma is not keeping good health. It is my good luck that I got the opportunity to initiate the present volume and establish contact with the Rastriya Samskrit Samsthan. Despite his failing health and eye sight he has gone through the proofs himself. For me he is a living example of the inspiring *upanishad vani,*

कुर्वन्नेवेह कर्माणि जिजीविषेत् शतं समाः ।

We are very grateful to Rashtriya Samskrit Samsthan, New-Delhi, for the financial support they have extended to print this work.

It is my bounden duty to thank Vidwan Janardana Hegde of Samskrita Bharati, Bangalore, who was kind enough to extend his timely help in bringing out this publication.

I offer my heartfelt pranams to vid. Sheshachala Sharma for his guidance. I also take pleasure in remembering Shatavadhani Dr. R. Ganesh for his affectionate enquiries regarding the publication. He is a great admirer of Prof. Sharma and has written a biography of the scholar in kannada by name *Vani vahana*, which has been already published.

Vagartha printers, Bangalore are the well-known printers who undertake Sanskrit work primarily. They deserve our appreciation for printing *Kavyodyana* neatly.

10-01-2009
Bangalore

Dr. S.R. Leela
M.L.C., Govt. of Karnataka
Formerly Prof. & H.O.D. of Sanskrit
N.M.K.R.V. College for Women, Bangalore

# Author - Prof. N. Ranganatha Sharma

Vid. N. Ranganath Sharma was born in Nadahalli, Shimoga District, Karnataka in the year 1916. He is 92 years old and is living in Bangalore in his grandson's house. Prof. Sharma is a great scholar highly respected for his depth of knowledge in Vyākaraṇa Śāstra and Vedānta Śāstra. His association with Samskrita Bhārati has given respectability to the oraganization. He has guided the Sanskrit Prasāra work undertaken by Samskrita Bhārati and supported their work with his in-depth knowledge of Sanskrit language and Grammar. He is also a poet of considerable merit.

He served as Vyākaraṇāchārya in the Chamarajendra Sanskrit College, Bangalore and has taught a number of sincere and serious students of Vyākaraṇaśāstra. His in-dept knowledge of Kannada language is well made use of by the Kannada Sahitya Parishat and other institutions of repute. He has translated several Sanskrit classics into Kannada which are considered the most authentic of their kind. We may mention the following works.

1. Vālmiki *Rāmāyaṇa* all the 7 *kāṇḍas*. in 8 volumes.
2. *Viṣṇu Purāṇa* in 2 volumes, pub. by Ramakrishna Matha, Bangalore.
3. Śrī Śaṅkara Digvijaya in 2 vols.
4. Bhāgavatam - 10th, 11th & 12th skandas.
5. *Śṛutisārasamuddharaṇa* of Sri Totakacharya
6. *Māṇḍūkyopaniṣat* with Sri Gowda Pada's *Kārika*.
7. *Pañcadaśi* of Sri Vidyaranya muni.
8. *Vyāsatātparyanirṇaya*
9. *Vākyapadīya* of Bhartruhari (Brahmakanda, Kriya and Kala Samuddesha).
10. *Amarakośa* - all the three *kāṇḍas* with *ṭīka*.
12. *Śrī Śaṅkara Sūkti Maṇihāra* (Translation of select quotations from Sri Shankara Bhashya).
13. *Śrī Śaṅkara Caritāmṛtam*.
14. Guruparamparacharitam
15. Taittiriyopanishat.
16. Gītasaptaka.

## Indipendent Works in Kannada

1. Mānava Dharma Śāstra mattu Mahileyaru.
2. Vyākaraṇa Shastrada Parivara.
3. Hubballiya Siddhapuruṣa - Siddhārūdharu.
4. Sri Rāma Katha Manjari.
5. Vālivadha Prasanga.
6. Rāmāyaṇada Nālku Pātragalu.
7. Vālmiki munigala Hāsyapravrutti.
8. Āstīkaparva.
9. Sandarbhasūkti (This is a collection of Sanskrit proverbs with explanation)
10. Vyāsarahasya - explanation of some kūṭaslokas.

Prof. Ranganatha Sharma was the president of the Translation Board at Kannada Sahitya Parishad. He edited and translated 13 ancient Kannada works into modern Kannada. The most important being Pampa's Ādi Purāṇa. All the 13 works are published by Kannada Sahitya Parishad, Bangalore.

Total number of works written by Prof. Sharma is about 80 including compositions in Sanskrit.

## Awards and honours

Vidwan Sharma is honoured by the Govt. of Karnataka, Govt. of India, Sringeri Matha, Swarnavalli Matha and many other institutions and individuals for his scholarship and contribution to Indian Literary Heritage. Following is a brief list of the awards conferred on Vidwan Sharma.

1. President's Award.
2. Mahamahopadhyaya by Rashtriya Sanskrit Vidyapitha. Tirupati.
3. Vidyavacaspati by Darbhanga Kendriya Sanskrit Vidyapitha, Bihar.
4. Pandita Ratnam by Sri Pejawar Swamiji, Udupi.
5. Pandita Raja by Swarnavalli Swamiji, Sonda.
6. Rajyotsava Prashasti, Karnataka.
7. Eight awards in the names of great scholars such as Sediyapu Krishna Bhatta, Dr. D.V. Gundappa, De.Ra.Je.

# काव्योद्यानम् - A Brief Introduction

काव्योद्यानम् is a collection of all the Sanksirt Compositions of Mahāmahopādhyāya Vyākaraṇāchārya Sri N. Ranganatha Sharma. This is truly a garden full of plants and colourful flowers fashioned by the poet. This collection has got three parts.

The first part begins with Vagdevata stuti and consists of the short compositions written from time to time like वीरोत्तेजनं, शारदापञ्चकम्, भावैकता, चैत्रोत्सवः, वर्षाकालः, मुक्तकानि, मातृस्तुतिः, मनोबोध, गोम्मटपञ्चरत्नं, three सुप्रभात poems and others totaling about 250 verses in different meters.

The second part has two short plays namely Ekachakram and Bāhubalivijayam. Ekachakram as the name makes it obvious, is a play based on the significant episode of Bakāsura Vadha from the Ādiparva of the Mahābhārata.

Bakāsura the man-eater had struck a treaty with the king of the city of the Ekachakra to get a cart full of eatables along with a human being daily for his food. When the pandavas along with their mother Kunti camped in the city, Bhima was advised by Kunti Devi to save the family which had sheltered them. Bhima was delighed at the advise of his mother and vanquished the asura with ease to set free the whole city of Ekachakra from the clutches of the demon.

Bakasura Vadha is the significant event that takes place in the play Ekachakra. The play is written in a simple and beautiful style and is enacted several times. It was also produced by Doordarshan, Bangalore, for its weekly programme **Sanskrit Sourabha.**

I am very happy to submit that I had the privilege of playing the role of Kunti Devi in this Drama. Abhinaya Bharati, Bangalore, the only Sanskrit Drama troupe had enacted this play several times.

Bahubalivijayam, is a play in four acts that sketches the life and personality of the legendary hero of Jaina tradition. The play highlights the extraordinary human qualities of the lead character, who gave up his kingdom to rule over the vast empire of Moksha Samrajya!

The play was written on the invitation of the Jain pontiff Charukirti Bhattacharya of the Matt at Sravana Belagola. The occasion was the 1000th Mahāmastakābhiśeka Utsava of the grand monolithic structre of Bāhubali at Śravaṇa Belagola, in the state of Karnataka. The play was enacted during the celebrations. It may be noted that there are very few plays on Bāhubali.

The third section consists of one Khaṇḍakāvya namely Shankara charitamrutam, with about 250 verses. This is a short poem sketchīng the life and achievements of the great Advaitacharya Sri Shankara Bhagavatpada. The whole poem is written in Anushtup meter and is an abridged version of the Shankara digvijaya by Sri Vidyāraṇya Muni. Shankara charitāmrutam is commendable for its easy flow and poetic merit.

The Suprabhatam compositions in the first part are for the deities Sri Subrahmanyaswami, Sri Ramachandra and for Sri Gommateshwara. The last one is the first of its kind. Our author was requested by the Swamiji of Sravana Belagola Matt to compose a suprabhatam as there was no suprabhatam for lord Gommateshwara. It is written in 8 meters. Harini, Śārdūlavikrīdita, Malini, also find place besides the most popular meter Vasantatilaka.

Kāvyodyānam is a brilliant testimony to the poetic abilities of Prof. Sharma.

10-01-2009 Dr. S.R. Leela
Bangalore *Managing Trustee, Abhinaya Bharati*

# नान्दी

## १. वाग्देवतास्तुतिः

कवीन्द्राणां चेतःस्फुरणमुपकल्प्याप्रतिहतं
हतं लोकं जाड्यात् अमृतरससेकेन निभृतम् ।
समुज्जीव्य श्रेयःसुभगचतुरस्रं विदधती
जयत्येका वाणी निखिलजनहृन्मध्यनिलया ॥

## २. गीर्वाणवाणीप्रशस्तिः

सुखदायिनि भवतारिणि जय संस्कृतसूक्ते
मृदुभाषिणि मुनितोषिणि जय विश्रुतकीर्ते ।
सकलावनिजनपावनि जय पुण्यविभूते
भवनेश्वरि भुवनेश्वरि जय विश्वविनूते ॥ १ ॥

श्रुतिचारिणि मतिकारिणि जय सूनृतवाणि
भ्रमनाशिनि बुधपोषिणि जय निर्जरवाणि ।
विधिभामिनि शुभकामिनि जय भारतभूषे
श्रवणामृतपदवादिनि जय देवि पुराणि ॥ २ ॥

कलनादिनि बलधारिणि ऋषिमानसजाते
रघुनन्दनगुणरञ्जनमुनिपुङ्गवगीते ।
कुरुपाण्डवचरिताम्बुधिजननि ध्रुवमूर्ते
जय भास्वति भगवन्मुखबहिरुद्गमपूते ॥ ३ ॥

गुरुशङ्करफणभृद्वरपरिमार्जितपादे
कविशेखरनिवहार्पितनवमौक्तिकहारे ।
वसुधार्चितबुधनिर्मितकृतिचित्रकिरीटे
जय भारति करुणेक्षितजगतीतलभाषे ॥ ४ ॥

## ३. श्रीशारदापञ्चकम्

सुरैः सिद्धैर्मर्त्यैर्यतिभिरपि पूतैर्मुनिवरैः
विरक्तै रक्तैश्च प्रणतिभिरुपश्लोक्यमहिमा
ऋषीणां हृन्निष्ठां प्रणवमहिता संश्रितवती
परा वाग्देवी सा तिरयतु ममाज्ञानतिमिरम् ॥ १ ॥

यदीयापाङ्गानामसितजलजातद्युतिमुषां
लवाद्वैधेयोऽपि प्रभवति सुराचार्यपदवीम् ।
क्षणादेवारोढुं, विधुतहृदयान्तःस्थजडिमा
परा वाग्देवी सा दलयतु ममाज्ञानतिमिरम् ॥ २ ॥

करे धृत्वा वीणां मधुरमधुरस्वानरुचिरां
वसाना वासोऽच्छं विमलशरदिन्दुच्छविहरम् ।
स्वयं शुक्ला शुभ्रस्मितरदनकान्तिर्विजयिनी
परा वाग्देवी सा क्रथयतु ममाज्ञानतिमिरम् ॥ ३ ॥

अधिष्ठात्री दिव्या निगमवचसां भव्यमहसां
सवित्री सूरीणां हृदि विशदविज्ञानविभवम् ।
जगद्धात्री नेत्री प्रथितसकलप्रौढविदुषां
परा वाग्देवी सा श्लथयतु ममाज्ञानतिमिरम् ॥ ४ ॥

विधातुः सौभाग्यं प्रगुणितकलानां प्रसवभूः
निदानं विद्यानां जनिरमरवाचां सुखसुवाम् ।
प्रजानां माङ्गल्यं शरणमखिलानाञ्च विदुषाम्
परा वाग्देवी सा ग्लपयतु ममाज्ञानतिमिरम् ॥ ५ ॥

# प्रकीर्णपद्यानि

# १. वीरोत्तेजनम्

जागृत जागृत भारतपुत्राः
चलतोत्तिष्ठत सम्भृतशस्त्राः ॥

शृणुथ न किं तं घर्घरनादं
प्रलयकरालं श्रुतिनिर्भेदम् ।
भैरवभेरी ध्वनितदिगन्तं
शत्रुविमर्दनमुद्घुष्यन्तम् ॥ १ ॥

शात्रवपांसुलपादत्रस्ता
भारतमाता शोचति शस्ता ।
निद्रां छिन्धि जहीहि च तन्द्रां
धर करवालं हर रिपुजालम् ॥ २ ॥

यत् स्वातन्त्र्यं बहुयत्नेन
भारतमाता प्रापत् स्वेन ।
निर्दयमर्दित नररुधिरेण
ह्रियते तत्तव मिषतोऽन्येन ॥ ३ ॥

दशरथपुत्रं स्मर दुर्धर्षं
भीमं भीमकृतिं सामर्षम् ।
भार्याकर्षणरोषितचित्तौ
जघ्नतुरुग्रौ समरे शत्रुम् ॥ ४ ॥

अद्य तु मातुः पश्य सखे त्वं
केशेष्वरिणा निहितं हस्तम् ।

त्यज निःश्रीकं ह्रीकरशोकं
    भज भज भार्गवसरणिम् ॥ ५ ॥

क्षत्रियधर्मं समरमवेहि
    भगवद्दिष्टं कर्णे धेहि ।
राज्यं भुङ्क्ष्व सपत्नं जित्वा
    स्वर्गं वा व्रज समरे मृत्वा ॥ ६ ॥

शान्तिर्दुष्टजनेषु व्यर्था
    क्लैब्यं मा स्म गमो हे पार्थ ।
स्वीयं धर्मं सम्यक् पाहि
    निर्भय भारत युध्यस्वेति ॥ ७ ॥

मस्तकमुच्चैरस्तु सखायः
    किं वः शाश्वतिकोऽयं कायः ।
द्रावितदुर्जनशत्रुनिकाया
    कीर्तिस्त्वेका भुवि निरपाया ॥ ८ ॥

किं ते भार्यासुतगृहलोभः
    भग्ने राष्ट्रे कास्ते लाभः ।
अन्याकीर्णं यदि ते राष्ट्रं
    विद्धि तदा तत् सर्वं भ्रष्टम् ॥ ९ ॥

जर्जरदेहे मा कुरु मानं
    निर्जरभावे भर संमानम् ।
भारतराष्ट्रध्वज उच्छ्रयतां
    भारत धर्मस्त्वनिशं ध्रियताम् ॥ १० ॥

घातुकघाते नास्ति नृहिंसा
हन्यादेवेत्युक्तिः किं सा ।
न श्रुतपूर्वा विश्रुतशास्त्राः
राष्ट्रियवीरा धृतशस्त्रास्त्राः ॥ ११ ॥

भारतधर्मो मर्षणसीमा
तथ्यं सर्वे मनुजा मान्याः ।
भ्रातर एव, परन्तु विरोधी
शस्त्रेणैव चिकित्स्यो द्रोही ॥ १२ ॥

विस्मृतिपथं यातु कश्मलविवादः
राष्ट्रियमतैरैक्यमस्तु न तु भेदः ।
जातिमतमौढ्यमुत्सार्यतां दूरात्
भारतम्बास्माकमेकैव माता ॥ १३ ॥

दृप्तमतङ्गजकुम्भोद्भेदन-
खरनखरोपमशस्त्रधराः
विद्युदद्भ्रस्फुरणोद्दीपित-
विष्वग्व्याप्तुवदस्त्रकराः ॥ १४ ॥

दिग्वल्लीष्वतिशुभ्रसुमोज्वल-
वृद्धिं यशसां वितनुध्वम् ।
भारतमातुर्दुःखध्वान्त-
ध्वंसनरवयो दीप्यध्वम् ॥ १५ ॥

## २. भावैकता

अयं हिन्दुः क्रैस्तो यवन इति भेदोऽपसरतु
ध्रुवं राष्ट्रं नेतुं प्रगतिपरमैक्यं विजयते ।
अपां व्यूहश्चैकश्चलयति महद्यन्त्रमपि तत्
समेषां चैतन्यं वहति खलु राष्ट्रप्रवहणम् ॥ १ ॥

यदि क्रोधोऽजय्यो भवति भवतः किं शृणु सखे
कुरु क्रोधं तर्हि प्रबलिनि मतासहने ।
तृषाशान्तिः कार्या न खलु सुरया किन्तु परया
पयःस्रुत्या देहेन्द्रियहृदयसन्तापहरया ॥ २ ॥

सौगन्ध्यमिव पुष्पेषु सर्वधर्मेषु सौहृदम् ।
अस्ति तेनोद्धरात्मानं बाह्याचारं किमीक्षसे ॥ ३ ॥

मध्विक्षुफलवर्गे यन्माधुर्यमनुवर्तते ।
तदिष्टं तत्किल ग्राह्यं न त्वचा नाकृतिः पुनः ॥ ४ ॥

कूपाद्वा गृह्यतां पाथो नलिकाया नदादपि ।
सिध्यत्यभीप्सितं चैवं श्रेयोऽखिलमतादपि ॥ ५ ॥

एको देवः सर्वभूतेषु साक्षी
तत्पुत्राः स्मो भारताम्बा च माता ।
सौभ्रात्रं नस्तोषणं सर्वकाले
मातापित्रोः सैव पूजा न चान्या ॥ ६ ॥

## ३. श्रीशृङ्गेरी सद्विद्यामहापाठशालायाः १०३ तमवत्सरीयमहोत्सवस्य अध्यक्षभाषणावसरे स्वीयश्लोकाः

शृङ्गेरीपुरवासिनी श्रुतिशिरःसञ्चारिणी तारिणी
तुङ्गातीरविहारिणी दिविषदां वाणी भवोत्सारिणी ।
श्रीमच्छङ्करदेशिकेन्द्रवचसां धात्री ध्रुवा देवता
भक्ताना वरदा बुधस्तुतपदा पायात् सदा शारदा ॥ १ ॥

अङ्कुशं द्वैतवादस्य शङ्कराचार्यमाश्रये ।
मद्गुरुं सद्गुरुं साक्षादद्वितीयं जगद्गुरुम् ॥ २ ॥

जहौ गृहसुखं वशी सपदि निर्व्रजन् शैशवे
पपौ गुरुमुखेरितं श्रुतिरसायनं शङ्करः ।
जगौ दिशि दिशि भ्रमन् भवविदारि तत्त्वं नृणां
कलौ किमपरः कृती तदुपमो मुनिर्वीक्षितः ॥ ३ ॥

ऊर्ध्वोर्ध्वमारुह्य यदर्थतत्त्वं
जगद्गुरोर्धीर्भृशमालुलोके
अतीत्य तद्वैदिकमन्यदीक्षितुं
सुधीर्न कश्चित् प्रभुरस्ति लोके ॥ ४ ॥

अभिनवगुणलक्ष्मीं वाक्पटुत्वे दधानाः
निरुपममतिशक्तिं शास्त्रजातेऽपि शुद्धाम् ।
मधुसमकरुणार्द्रां भक्तवृन्दे च दृष्टिं
विदधतु कुशलं श्रीभारतीतीर्थपादाः ॥ ५ ॥

# ४. मुक्तकानि

कः पक्षः संश्रितस्ते परमगुणनिधे 'काङ्ग्रेस् ऐ पूर्वरात्रे'
'फार्वर्ड्ब्लाक् प्रातरद्य प्रचलति हृदयं निर्वृतं नात्र पक्षे ।
सत्यं ब्रूयां सखे त्वां शृणु मम जनतापक्ष एव प्रियः स्यात्
धावेद्यत्र प्रभूतं प्रवहति मधु तत् पुष्पमेवालिवृन्दम् ॥ १ ॥

विद्युद्वल्लीवलित इव नीलाम्बुदो नीरजास्यः
सीताश्लिष्टः कनकरुचिना वायुपुत्रेण भक्त्या ।
संवाह्याङ्घ्रिर्भजकजनताभद्रकोदण्डमुद्रः
पायादेतौ रघुकुलपतिर्दम्पती सन्ततश्रीः ॥ २ ॥

श्लिष्टशब्दनिबिडं जटिलोक्तं
कूटशब्दघटितं पटुवेद्यम् ।
नैषधीयचरितं यदि भेद्यं
नारिकेलमिव तत् खलु हृद्यम् ॥ ३ ॥

भासो हासः कविकुलगुरुः कालिदासो विलासः
शब्दब्रह्मप्रमितभवभूतिस्तु यस्याः प्रकाशः ।
सेयं वाणी रघुकुलपतेर्नाम सङ्कीर्तयन्ती
श्रेयो देयादमृतरसनिष्यन्दिनी सज्जनानाम् ॥ ४ ॥

जयत्येको भासः प्रभुरुचितवागर्थघटने
पटुः काव्यांशानां सरसपरिवृत्त्यान्यकरणे ।
दयावान् दोषेऽपि प्रकटितगुणानां जनिभृतां
प्रसूतिः शुभ्राणाममृतलहरीणामिव गिराम् ॥ ५ ॥

मोहान्धकारहरणो विषयोन्मुखानां
स्नेहामृताशनरतो निजसेवकानाम् ।
निर्भासको निखिलयोगमहापथानां
देदीप्यते भुवि गदाधरधर्मदीपः ॥ ६ ॥

हे रामकृष्ण मधुरं तव सच्चरित्रं
त्वत्पुण्यनाम मधुरं मधुरं त्वदङ्गम् ।
सम्भाषणञ्च मधुरं मधुरञ्च गानं
तत् किन्नु यन्न मधुरं भवति त्वदीयम् ॥ ७ ॥

वासिष्ठः कविशेखरः कुलपतिः साहित्यविद्यागुरुः
सर्वाम्नायविदग्रणीः श्रुतिशिरोमालाजटालो मुनिः ।
वाग्मी वादिगदाङ्कुशः कलियुगव्यासस्तपो देहभृत्
वेदानामवनाय पावनयशा आविर्बभूवावनौ ॥ ८ ॥

बीजं वाल्मीकिगीतश्रुतिसुभगकथाकल्पवल्लीसमृद्धेः
मूलं दैत्येन्द्रकल्पोद्धतशमनविधौ भागधेयं मुनीनाम् ।
पुष्पं सौजन्यसम्पन्मयविनयतरोः श्रोत्रपेयं जनानां
नाम श्रीधामरामेत्यसमसुखफलं व्यादिशेत् सज्जनानाम् ॥ ९ ॥

## ५. कर्णाटकविधानपरिषत्सदस्यस्य श्रीनरहरिमहोदयस्य अभिनन्दनसमारम्भे स्वागतपद्यमालिका

स्वस्ति श्रीरस्तु मातस्त्रिभुवनमहिते देवि गीर्वाणवाणि
 व्यासप्रष्ठैर्मुनीन्द्रैरहरहरुदितश्रौतशब्दोपसेव्ये ।
यावद् भूमौ ध्रियन्ते नरहरिसदृशा वाग्मिनः शासितारः
 तावत्ते नैव कार्यस्तनुरपि तनिमप्राप्तिशङ्काविषादः ॥ १ ॥

प्राचीनाचार्यवर्यानुदिनरचितग्रन्थपुष्पार्चिताङ्घ्रे
 वाचां मोचाफलानां मधुररसमुचां मार्मिकैः कोविदाग्र्यैः ।
भासाद्यैः शारदेन्दुद्युतिमतिविततामम्ब ते दिक्षु कीर्तिं
 जानन्तः सन्ति सन्तो नरहरिसदृशा देवि मा भूद्विषादः ॥ २ ॥

आर्य श्रीमन् नमस्ते नरहरिपदसम्बोध्य गीर्वाणवाणी-
 प्राणास्माकीनराज्ये प्रथमपरिषदि प्रस्तुतानां विधीनाम् ।
स्वीकृत्यामर्त्यवाचा कविकुलनुतया शासकस्त्वं प्रतिज्ञां
 ऐदम्पूर्व्यं व्यतानीः, विकसितमनसः स्वागतं ते विदध्मः ॥ ३ ॥

प्राज्यैरिज्यादिकृत्यैः प्रचयमुपगता भारती संस्कृतिर्या
 यामाहुस्तत्त्वशास्त्रैरतुलितयशसं सूरयस्ते प्रतीच्याः ।
तामुद्दामप्रभावां दधति किल गिरःसंस्कृतास्तद्रहस्यं
 वेत्थ त्वं तेन हृष्टा वयमिह नृहरे स्वागतं व्याहरामः ॥ ४ ॥

केचिद्दीनाश्चरन्तो विकलितमतयो ह्रीकरोलूकचर्यां
 सौरं तेजोऽसमर्थाः सहितुमुपचितं संहरन्ति स्वचक्षुः ।

केचिद्हंसायमाना नरहरिसदृशाश्चक्षुरुन्मील्य धीराः
सारं सारस्वतं संस्कृतगिरि निहितं तं पिबन्तो जयन्ति ॥ ५ ॥

आदर्शः स्थापितोऽयं सपदि नरहरे शासकानां समेषां
स्वीकार्यासौ प्रतिज्ञा परिषदि सकलैः स्वीयया भाषयेति ।
स्वीया चैषैव वेद्या भरतभुवि समा संस्कृता जातु नान्या
मान्या ध्वन्यध्वनैवं ध्वनितवत इदं स्वागतं व्याहरामः ॥ ६ ॥

प्राचार्याः पाण्डुरङ्गिप्रभृतिबुधगणाः स्वागतं वः सभायां
ये छात्राः ये च वाचां महिममधुरतावेदिनः संस्कृतज्ञाः ।
सौहार्दादागताः संस्कृतगिरि पुरुषा योषितः साभिमानाः
तेषां युष्माकमेते सविनयविहिताः सन्तु साधुप्रणामाः ॥ ७ ॥

वयमिह मिलिताः स्मः शासकं तं वरेण्यं
नरहरिमभिनन्द्य स्याम धन्याः कृतज्ञाः ।
इति हृदि परिचिन्त्य, श्रीहरिः पातु सर्वान्
जयतु विबुधवाणी तारिणी सज्जनानाम् ॥ ८ ॥

## ६. श्रीमातृस्तुतिः

श्रीविद्वद्वरसद्गुरोर्नरहरेः सत्सम्प्रदाये स्थितां
श्रीलक्ष्मीनरसिंहदेशिककृपासम्प्राप्तदीक्षां शुभाम् ।
श्रीसिंहाद्रिकरावलम्बनविधेः संवृद्धपुण्योदयां
श्रीदेवीसदृशीं दृशा विमलया श्रेयो दिशन्तीं नुमः ॥ १ ॥

नित्यतृप्तिनित्यतुष्टिनित्यभक्तिनिश्चलां
सत्यदृष्टिसत्यशक्तिचित्तशुद्धिभिः स्थिराम् ।
भक्तकोटिवन्द्यमानपावनाङ्घ्रिपङ्कजां
नागवेणिनामिकां स्मराम्यहं मदम्बिकाम् ॥ २ ॥

वागतीतवस्तुशोधने सदा समाहितां
रागदूरमानसां विशुद्धशीलशोभिताम्
त्यागभोगयोः समानयोगबुद्धिमाश्रितां
नागवेणिनामिकां स्मराम्यहं मदम्बिकाम् ॥ ३ ॥

स्वप्नसुप्तिजागरेषु राजते यदन्वहं
ज्योतिरेकमद्वितीयमस्मि तन्निरन्तरम् ।
इत्यभेदबोधनष्टजन्ममृत्युबन्धनां
नागवेणिनामिकां भजाम्यहं मदम्बिकाम् ॥ ४ ॥

शिष्यशिक्षणे विचारदक्षवाक्यवादिनीं
भक्तचित्तशोधने चिरन्तनोक्तिभाषिणीम् ।
पादपद्मसंश्रिते कृपाकटाक्षचारिणीं
नागवेणिनामिकां भजाम्यहं मदम्बिकाम् ॥ ५ ॥

ज्ञानमुद्रयेशजीवभेदबुद्धिवारिणीं
ध्यानमुद्रया चिरं मनोजयस्य बोधिनीम् ।
ज्ञानयोगभक्तियोगकर्मयोगगामिनीं
नागवेणिनामिकां नमाम्यहं मदम्बिकाम् ॥ ६ ॥

पञ्चभूतसञ्चये कलेवरे विनश्वरे
चिन्तनं विहाय हृद्यवस्थिते चिदम्बरे ।
सन्ततं मनो निधायचिद्रसे विहारिणीं
नागवेणिनामिकां नमाम्यहं मदम्बिकाम् ॥ ७ ॥

शमदमसम्पत्पूर्णां
पूर्णे ब्रह्मणि समाप्तविज्ञानाम् ।
विगलितभौतिकभावां
वन्दे सच्चित्सुखाम्बुधौ लीनाम् ॥ ८ ॥

श्लोकाष्टकमिदं पुण्यं यो भक्त्या नियतं पठेत् ।
स परां सिद्धिमाप्नोति गुरोः करुणया ध्रुवम् ॥

## ७. मनोबोधः

श्रीपतेः पदं श्रीकरं परम् ।
हे मनश्चिरं ध्याय तद्वरम् ॥ १ ॥

किं नु ते तया भोगचिन्तया ।
क्ष्वेडदन्तया भ्राम्यसे यया ॥ २ ॥

पङ्किले जले सङ्कटाकुले ।
चङ्क्रमं पुनः किं करोषि हे ॥ ३ ॥

कीशकल्प रे श्रीहरेः पदे ।
निर्मले जले मज्ज निष्कले ॥ ४ ॥

अर्थसञ्चयं चिन्तयस्यलम् ।
मृत्युमप्यहो चिन्तय क्षणम् ॥ ५ ॥

तृप्तिरेव नो वित्तराशिना ।
नाज्यबिन्दुभिः शम्यतेऽग्निना ॥ ६ ॥

कामलालनं खड्गलेहनम् ।
भोगजीवनं भोगिचुम्बनम् ॥ ७ ॥

याहि हे मनो राममाश्रयम् ।
रामनाम ते धाम सुस्थिरम् ॥ ८ ॥

कर्म सञ्चितं भुक्तमुत्कटम् ।
रामनामजं भोक्ष्यसे सुखम् ॥ ९ ॥

पिङ्गलाख्यया वेश्यया शुके ।
नामशिक्षणात् साधितं शिवम् ॥ १० ॥

पुत्रमाह्वयन् विष्णुनामकम् ।
कोऽप्यजामिलः प्राप सद्गतिम् ॥ ११ ॥

भक्तिरस्तु ते रामनामनि ।
सत्यचिन्मये शान्त आत्मनि ॥ १२ ॥

मन्मना भव मां नमस्कुरु ।
इत्थमाह यस्तं भज प्रभुम् ॥ १३ ॥

चिन्मये सुखं यादृशं नवम् ।
तन्न जातुचित् स्वादितं त्वया ॥ १४ ॥

हे मनो मम क्षेमसद्धये ।
याहि सत्वरं श्रीहरेः पदम् ॥ १५ ॥

नो शृणोषि चेत् मूर्खमानस ।
प्राप्य दुर्गतिं क्लिश्यसे चिरम् ॥ १६ ॥

कोटिजन्मतः शाठ्यमेव ते ।
पातितोऽस्म्यतः क्लेशसागरे ॥ १७ ॥

भ्रष्टमार्ग हे शिष्टवन्मम ।
इष्टतामगाः दुष्टमायया ॥ १८ ॥

मत्तकाशिनीवित्तकाम्यया ।
मत्तमुद्धतं चित्त मां व्यधाः ॥ १९ ॥

इन्दिरापतिं नन्दनन्दनम् ।
चन्दिराननं व्यस्मरं विभुम् ॥ २० ॥

किं तु मानस प्राप्तवानहम् ।
सख्यतस्तव स्वात्मसंविदम् ॥ २१ ॥

स्वस्ति याहि भो यत्र ते सुखम् ।
मत्पुरः परं तिष्ठ न क्षणम् ॥ २२ ॥

हन्त ! किं शठो माञ्च कर्षति ।
नक्रवद् बलात् नैव मुञ्चति ॥ २३ ॥

किंकरोम्यहं किं करो हरेः ।
बन्धमोचकं प्रार्थये प्रभुम् ॥ २४ ॥

हे हरे गुरो भक्तमाश्रितम् ।
रक्ष मां विभो मास्तु बन्धनम् ॥ २५ ॥

चित्तनामकः शत्रुरेष मे ।
पातयत्ययं मां पुनर्भ्रमे ॥ २६ ॥

करुणया हरे त्वरय रक्षणे ।
मम चिरन्तनं परिहर भ्रमम् ॥ २७ ॥

गुर्वनुग्रहात् प्राप्तविद्यया ।
बन्धनं चिराद् लयमुपैद् बलात् ॥ २८ ॥

सच्चिदात्मकं स्वस्वरूपकम् ।
विस्मरन्नहं वञ्चितश्चिरम् ॥ २९ ॥

केवले स्थिरे नित्यनिर्मले ।
स्वे निरञ्जने संस्थितः पदे ॥ ३० ॥

अस्म्यह्वँ शिवः सोऽस्म्यह्वो सुखम् ।
हा३उ ह३उ हा हा३उ हा३उ हा ॥ ३१ ॥

# ८. श्रीगोम्मटेश्वरपञ्चरत्नम्

नितान्तशान्तिसंयुतं प्रशान्तलोकचिन्तितं
चिरन्तनैर्निरन्तरं हृदन्तरेऽनुमन्त्रितम् ।
सदुक्तिधारिणां वरं विमुक्तिदायिनां परं
भजे भवाम्बुधेस्तरिं चिराय गोम्मटेश्वरम् ॥ १ ॥

परीषहापराजितं गिरीश्वराग्रसंस्थितं
लतावितानवेष्टितं तपः परं समाश्रितम् ।
निरञ्जनं निरालयं सुखाकरं शुभावहं
भजे भवाम्बुधेस्तरिं चिराय गोम्मटेश्वरम् ॥ २ ॥

अरालल्लोलितालकावलीविलासितालिकं
करालकर्ममर्मभेदनिर्मलं निरामयम् ।
सरोरुहास्यशोभिफुल्लमल्लिकादरस्मितं
भजे भवाम्बुधेस्तरिं चिराय गोम्मटेश्वरम् ॥ ३ ॥

विधूतमोहविक्लवं विशोधिताखिलास्रवं
सुरेन्द्रचक्षुरञ्जनं[१] मुनीन्द्रचित्तरञ्जनम् ।
कषायदोषभञ्जनं वृषेश्वरस्य नन्दनं
भजे भवाम्बुधेस्तरिं चिराय गोम्मटेश्वरम् ॥ ४ ॥

अनङ्गरागनाशनं भुजङ्गभोगभूषणं
विशुद्धबोधमण्डितं मदीयभाग्यसञ्चितम् ।
महत्तरं गुणोत्तरं दिगम्बरं हृदम्बरे
भजे भवाम्बुधेस्तरिं चिराय गोम्मटेश्वरम् ॥ ५ ॥

---

[1] सुरेन्द्रचक्षुः अञ्जनम् = इति च्छेदः

# ९. राष्ट्रदेवो भव

मनसि वचसि काये मातृदेवो भव त्वं
निरवधिपितृदेवो निर्मलः कर्मयोगी ।
अथ मतिपरिशुद्ध्याचार्यदेवश्च भूयाः
तदनु विगतशङ्कः श्रद्धया राष्ट्रदेवः ॥ १ ॥

तृणजलकुसुमानां वाससां भूयसां ते
फलयवपयसाश्च प्राज्यतामार्जयन्ती ।
विविधवनलताभिर्दैहिकीं मार्जयन्ती
रुजमधिकदया ते सेव्यतां जन्मभूमिः ॥ २ ॥

खरकिरणसमानामुग्रकार्यक्षमाणां
परधनपरदाराकृष्टबुद्धिं सुतानाम् ।
सकरुणगलदश्रु प्रेक्ष्य मोहं वहन्ती
भृशमधिकवया भूः सान्त्व्यतां राष्ट्रमाता ॥ ३ ॥

# १०. ज्योतिर्वितानम्

यच्चैतन्यकला जडं जगदिदं सञ्जीवयत्यञ्जसा
यद्दीप्त्या निबिडं प्रणश्यति नृणामज्ञानरूपं तमः ।
यस्यानुग्रहलेशतो बुधगणाः शश्वत् प्रतिष्ठां गताः
तत् सारस्वतवैभवं विजयते ज्योतिश्चिरं प्रोज्ज्वलम् ॥ १ ॥

यथा तितीर्षोरुदधे परं नौः
यथा मुमुक्षोः परमेशभक्तिः ।
ज्योतिर्यथा वा भ्रमतोऽन्धकारे
सरस्वति त्वं शरणं तथा मे ॥ २ ॥

संस्कृताङ्ग्लादिभाषाभिः प्रजासौख्यविधायिने ।
शब्दरूपविवर्ताय कस्मै चिज्ज्योतिषे नमः ॥ ३ ॥

## ११. श्रीकृष्णः

कामज्वरं व्रजस्त्रीणां कंसादीनां मदज्वरम् ।
भवज्वरश्च भक्तानां हन्ता दैव्यो भिषग् हरिः ॥ १ ॥

यशोदाया भाग्यं समुपचितपुण्यं व्रजसदां
विधिः कंसादीनां निधिरनवधिर्वेदवचसाम् ।
मतिः कौन्तेयानां गतिरमृतदात्री जनिभृतां
महो मे हृद्यास्तां किमपि तिरयन् मोहतिमिरम् ॥ २ ॥

मायासृष्टां निखिलजगतीमात्मनानुप्रविश्य
क्षेमायास्याः हरिहरविरिञ्चाभिधानं दधानः ।
श्रेयः प्राप्त्यै सुगमपदवीमुद्धवव्याजतोऽस्मान्
आनैषीद्यः स परमगुरुः स्तूयतां वासुदेवः ॥ ३ ॥

# १२. समस्यापूर्तिः

मुनीन्द्रचित्तं प्रयतं विवृण्वती
कवीन्द्रचेतःस्फुरितं वितन्वती ।
अशेषभाषा अनुगृह्णती सती
प्रवर्धतां संस्कृतवाङ्मयश्रीः ॥ १ ॥

क्वचिद् गभीरा कटुशब्दभाषिणी
क्वचिन्मनोज्ञा रसभावनिर्भरा ।
द्विधा विभान्ती गृहिणीव ते गृहे
प्रवर्धतां संस्कृतवाङ्मयश्रीः ॥ २ ॥

(क्वचित्=शास्त्रे, गृहकार्यविशेषे च । क्वचित्=काव्ये एकान्ते भोजनादौ च)

चुलुकितफणिवाचां न्यायशास्त्रे प्रभूणां
अवगतशबरोक्तिप्राप्तधीकौशलानाम् ।
अयि जड भव तूर्ष्णीं पण्डितानां समाजे
मशक दशनमध्ये वारणाः सञ्चरन्ति ॥ ३ ॥
(मशक, दश, न, मध्ये-इतिच्छेदेन समस्यापरिहारः)

समायान्तं कामादलसगमनं क्रूरनयनं
परीतं दासीभिः करविधृतदीपादिभिरलम् ।
मदान्धं पौलस्त्यं विकृतमनसं राक्षसचमू
पतिं दृष्ट्वा सीता व्यपनयति कोपेन वदनम् ॥ ४ ॥

अर्थस्य शक्त्या कलहप्रवृत्त्या
युक्त्याऽथवा स्पर्धिषु दुर्मदेषु ।

वाक्पौरुषालम्बिषु शासकेषु
  दीनाः कथं वा सुखिनो भवेयुः ॥ ५ ॥

स्त्रीष्वन्यदीयास्वनिमेषदर्शनं
  सुरालये प्रीतिरनादरः कवौ ।
गुरूपदेशाच्चहराजसेवनं
  कलौ युगे हन्त नरोऽपि देवः ॥ ६ ॥

(अधोरेरवाङ्कितेषु श्लेषो द्रष्टव्यः । चहराजः=प्ज्ळ, हरस्य अजस्य च सेवनम्)

उद्विग्नो भुवि धर्मकञ्चुकधरैर्धूर्तैर्बकज्ञातिभिः
  निर्विण्णः कपटोत्कटैः कटुरवैः किं राजकीयैर्जनैः ।
क्षुब्धः किं कलहोद्भटार्भटकृतैः शार्दूलविक्रीडितैः
  शान्तिं शाश्वतिकीमभीप्सुरथवा चन्द्रं गतो मानवः ॥ ७ ॥

आज्ञा पुनः कस्य न लङ्घनीया
  हिमालयः कां प्रददौ शिवाय ।
लोकेषु कां पूज्यतमां गृणन्ति
  पितुः सुतां मातरमामनन्ति ॥ ८ ॥
  (त्रयाणां प्रश्नानां क्रमादुत्तराणि)

परेद्युर्वैवाहो विधिरतिबलश्चैद्यहतकः
  सखा भ्रातुः कुर्यां किमिति विकला भीष्मकसुता ।
द्विजानीतं सद्यो हरिलिखितपत्रं सकुतुका
  समुद्रं भित्वासौ परमुपगता हर्षमबला ॥ ९ ॥
  (समुद्रं=मुद्रया सहितम्)

अथ श्रुत्वा रक्षोधिपतिवचनं राक्षसगणैः
प्रदीप्ते लाङ्गूले निबिडमुपसंवेष्ट्य वसनैः ।
हनूमान् सङ्क्रुद्धः पवनजनुषासौ हुतभुजा
सह भ्रात्रा वीरो व्यचरदुपरिष्टात् प्रतिगृहम् ॥ १० ॥
('वायोरग्निः' इति श्रुतेरग्निः हनूमतो वायुसुतस्य भ्राता)

गुरुगिरिगरिमाणं तोलयित्वा चरेत् कः
फणिपतिशिरसि त्वामन्तरा कोहि नृत्येत् ।
यमसदनगतश्चाप्यर्भकं जीवयेत् कः
परमपुरुष शक्तिं तेऽवबोद्धुं क ईशः ॥ ११ ॥

गलिताङ्गो जरसालसोऽप्यविमृशन् शास्त्रं हरिश्चास्मरन्
रमणीलोचनपद्ममीलनविधौ चन्द्रायमाणं मुखम् ।
पलितं बिभ्रदटन्नदभ्ररसनाचापल्यतो भूरिभो-
जनकार्ये निरतः सदा जडमतिर्हास्यास्पदं नारदः★ ॥१२॥
(नारदः=अरदः गलितदन्तः, ना=पुरुषः इति विवक्षितोऽर्थः । नारदमुनिरित्यापाततः प्रतीतिः)

भो भोः पाश्चात्यविद्यापरिणतमतयो राष्ट्रिया भारतीयाः
प्राचीनाचार्यजुष्टा विमलसुरगवी दुग्ध एवामृतं नः ।
बुद्धेरुल्लासमुच्चैरपघनघनतामादधानं प्रधानं
पीत्वा रंरम्यतां तत्, किमु विगतरसासारलघ्वा यवाग्वा ॥१३॥

---

★ वृत्तम् - ललिताङ्गी सबरायमौ यलगवच्छिन्ना पदान्ताक्षरैः ।

जगत् सर्वं मिथ्या भवति खलु सत्यं तु परमं
सदाख्यं ब्रह्मैव प्रथितबहुरूपं विलसति ।
इति ज्ञातार्थस्य प्रथमविदुषो नास्तिहिभिदा
हरे हारे हीरेऽचरचरेनासुरसुरे ॥ १४ ॥
(हीरं=वज्रम्, अचर-चर-इन-असुर-सुर-इत्येतेषां समाहारद्वन्द्वः)

## १३. श्रीरामायणम्

सृष्टिं स्वामवलोक्य कष्टबहुलां नीचोच्चभावं गतां
कृष्टान् मोहतमस्यदम्यविषयासङ्गांश्च खिन्नान् जनान् ।
स्रष्टुं लोकमदुःखमद्भुतममर्त्यानां स्पृहायाः पदं
वाल्मीकिं विभुरादिशन्मुनिवरं प्रीत्या स्वयम्भूः स्वयम् ॥ १ ॥

सोऽयं लोकः परमतपसा तेन रामायणात्मा
सृष्टः क्लेशप्रशमनकरः कामनीयः सुराणाम् ।
यस्मिन्नित्यं नवरसमयः स्यन्दते वाग्विलासः
यस्यास्वादान्निरवधि सुखं विन्दते सज्जनौघः ॥ २ ॥

श्रीरामः

कौसल्यानयनोत्सवो दशरथस्योद्यत्तपस्याफलं
विश्वामित्रमनोरथो जनकभूपालस्य भाग्योदयः ।
वैदेहीवदनारविन्दमधुपः कोदण्डझङ्कारभूः
धर्मस्यैकपरायणं विजयते श्रीरामचन्द्रः प्रभुः ॥ ३ ॥

# १४. चैत्रोत्सवः

हिमानि धुन्वन् कुसुमानि हासयन्
फलानि तन्वन् व्रततीश्च नर्तयन् ।
द्रुमावलीः पल्लवयंश्च हर्षयन्
जनान् वसन्तः समुपागतः सखे ॥ १ ॥

शितशीतलतुहिनकणैः
खरतरवातैर्हतैर्निशीथैश्च ।
व्याधैरिव मृगपोताः
खिन्नाश्चैत्रेण मोचिता दीनाः ॥ २ ॥

ग्रीष्मे चोष्ममरीचिनाऽखिलजगद्द्वन्दह्यते निर्दयं
वर्षासु स्तनितोद्धुरैर्जलधरैश्चेखिद्यते सन्ततम् ।
हेमन्तेऽधिकशैत्यमेव शिशिरे सान्द्रा हिमानीधुनी
स्थाने तत्कवयः समीप्सितगुणं सन्तं वसन्तं विदुः ॥ ३ ॥

हरिद्वर्णैः पत्रैः सितरुधिरपीतैश्च कुसुमैः
विराजन्तो वृक्षा मम मनसि हर्षं विदधते ।
इमेऽनङ्गादेशात् धृतशरशिरस्त्राणकवचाः
वशीकर्तुं विश्वं सपदि समवेताः किमु भटाः ॥ ४ ॥

चित्रैः पत्रैः प्रफुल्लैः सुरभिसुमचयैर्भृङ्गसङ्गीतगीतैः
नीपैश्चेतोऽपहारिप्रमदवनलतामञ्जरीवञ्जुलैश्च ।
मित्रैर्मन्दानिलाद्यैः पिकशुकनिकरोद्धुष्टवाद्यैः प्रतीतो
जैत्रं चैत्रोऽधिरूढो ललितकिसलयोद्भासि चूतं वरूथम् ॥ ५ ॥

# १५. वसन्तऋतुः

अप्रियातिथिसमे शिशिरर्तौ
स्वप्नदृष्ट इव नष्टमुपेते ।
इष्टमित्रमिव दृष्टिसुखाय
पश्य पुष्परथ एति वसन्तः ॥ १ ॥

वृक्षान् पल्लवयन् लताः कुसुमयन् भृङ्गावली रञ्जयन्
शैत्यात् सङ्कुचितोद्यमान् मृगगणानुल्लासयन् लासयन् ।
पद्मान्युद्गमयन् सरःस्वनुपमां लक्ष्मीं पुनःस्थापयन्
कीर्तिं स्वां पिककूजितैः श्रुतिसुखैरुद्गापयन्नागतः ॥ २ ॥

मन्दं मन्दं व्यजति पवनः दक्षिणाशाऽस्य राज्ञः
हंसाः शुभ्रं दधति पवनं चामरै रम्यपक्षैः ।
वृक्षा नूनं ध्वजपटमिमे पल्लवैर्धारयन्ते
चित्रामग्रे व्रततिवनिताः पुष्पवृष्टिं किरन्ति ॥ ३ ॥

याते शीते प्रभूते सपदि मुदमयुर्जीर्णवस्त्रा जरन्तो
भूतं प्राप्तं परीक्षाभिधमिति सहसा छात्रवृन्दं विषण्णम् ।
इत्थं धूर्तो वसन्तो जलद इव मुदं वर्षणात् कर्षकाणां
अध्वन्यानां विषादं युगपदुपनयन् आगतः कामगामी ॥ ४ ॥

# १६. वर्षाकालः

खरकरपरितप्तान् सान्त्वयन् धीरशब्दैः
शरमुचमपि चापं धारयन् श्यामलश्रीः ।
कनकसुभगसीताविद्युदालिङ्गिताङ्गो
रमयति जलवाहो भद्रकारीव रामः ॥ १ ॥

रविकरपरिखिन्नैर्हर्षसम्फुल्लनेत्रैः
व्यवसितकृषिकृत्यैः कर्षकैर्वीक्ष्यमाणः ।
जनकतनुजयेवालिङ्गितः श्यामलाङ्गो
रघुपतिरिव मेघो विद्युता द्योततेऽसौ ॥ २ ॥

कनकमयकशाभिर्विद्युदाख्याभिरेते
निशिचरगणबुद्ध्या ताडिता वासवेन ।
स्तनितमयनिनादैर्नीलकाया रुदन्तो
ध्रुवमिह जलवाहाः पातयन्त्यश्रुधाराम् ॥ ३ ॥

# सुप्रभातस्तोत्राणि

# १. श्रीरामचन्द्रसुप्रभातम्

श्रीरामचन्द्रदयिते सीते जनकनन्दिनि ।
उत्तमे सर्वनारीणां सुप्रभातं मदम्ब ते ॥ १ ॥

कौसल्या सुप्रजा राम पूर्वा सन्ध्या प्रवर्तते ।
उत्तिष्ठ नरशार्दूल कर्तव्यं विश्वमङ्गलम् ॥ २ ॥

आजानुबाहुररविन्ददलायताक्षः
कोदण्डपाणिरनुजावनिजासहायः ।
ध्येयः सदा सकललोकहृदन्तरात्मा
राम त्वमेव शरणं तव सुप्रभातम् ॥ ३ ॥

वाक्यं गुरोरनुसरन् कुशिकात्मजस्य
हत्वा सुकेतुतनयामनयप्रतिष्ठाम् ।
धर्मस्य वीर जयमाद्यमदर्शयस्त्वं
श्रीरामचन्द्र रघुपुङ्गव सुप्रभातम् ॥ ४ ॥

यज्ञस्य रक्षणविधावथ गाधिसूनोः
अस्त्रेण ते सदहितो निहतः सुबाहुः ।
दैत्यः परोऽह्रियत पर्णमिवार्णवान्तः
श्रीरामचन्द्र रघुनन्दन सुप्रभातम् ॥ ५ ॥

गत्वा विदेहनगरीममरैरनम्यं
रौद्रं धनुर्दलयता जयतायताक्षीम् ।
काकुत्स्थ कीर्तिवनिताप्यमला त्वयाप्ता
सीतापते रघुपते नृपते प्रभातम् ॥ ६ ॥

घोरं प्रगृह्य परशुं परुषं ब्रुवाणो
धीर त्वया धृतशरेण स रैणुकेयः ।
नीतः शमं विपिनवह्निरिवाम्बुदेन
श्रीरामचन्द्र जय सम्प्रति सुप्रभातम् ॥ ७ ॥

हत्वा विरोधिनमसच्चरितं विराधं
दत्वा वनेषु यमिनामभयं दयालो ।
लक्ष्मीपते विजयसे यशसेश नित्यं
श्रीरामचन्द्र जगदिन्द्र तव प्रभातम् ॥ ८ ॥

एकाकिना खरपराक्रमिणः खराद्याः
लोकं यमस्य गमिता भवता क्षणेन ।
तिष्ठन्ति किं नु भगणा द्युमणेः पुरस्तात्
श्रीरामचन्द्र सुरवन्दित सुप्रभातम् ॥ ९ ॥

सौवर्णवर्णवपुषा तव कर्तुमिच्छन्
मायाविनिर्मितजगत्त्रितयस्य मोहम् ।
मूढोऽसुरः शकलितः शितसायकेन
श्रीरामचन्द्र जय राघव सुप्रभातम् ॥ १० ॥

उग्रोरगाविव निकृत्य करालबाहू
प्रक्षिप्य भीष्मवपुषं सुषिरे कबन्धम् ।
सौमित्रिणा सह मदीश ययाथ पम्पां
श्रीरामचन्द्र रघुवीर जय प्रभातम् ॥ ११ ॥

सुग्रीवसख्यबहुलीकृतकार्य शीघ्रं
सूनुं निषूद्य भवता बलिनं बलारेः ।
धर्मस्य सूक्ष्मतमता विवृताऽवता नः
श्रीरामचन्द्र मनुजेन्द्र जय प्रभातम् ॥ १२ ॥

अथ विरहसमुत्थं शोकवह्निं प्रियायाः
रघुवर शमयिष्यन् स्तम्भयन्नम्बुराशिम् ।
त्रिभुवनजयकेतुं बन्धयित्वाऽथ सेतुं
प्लवगबलमनैषी राम ते सुप्रभातम् ॥ १३ ॥

पवनतनयमेरोः शृङ्गमारुह्य तुङ्गं
रविरिव किरणौघैः कीर्णमन्धं तमिस्रम् ।
सपदि दनुजवृन्दं घोरमस्त्रैरुदस्यन्
रिपुनिवहमजैषी देव ते सुप्रभातम् ॥ १४ ॥

गिरिमिव गुरुकायं भीषणं कुम्भकर्णं
कवलमिव कपीनां यूथमाचामयन्तम् ।
मदगजमिव सिंहः संहरन् जिह्मगैस्तं
सकलसुरगणैस्त्वं संस्तुतः सुप्रभातम् ॥ १५ ॥

लङ्कायां त्वं निशिचरपतिं साम्पराये मथित्वा
भक्तं साधुं तदनुजमथो स्थापयित्वा स्वराज्ये ।
देव्या युक्तः कनकनिभया विद्युतेवाम्बुवाहः
प्राप्तोऽयोध्यां भरतवरदो राम ते सुप्रभातम् ॥ १६ ॥

यदर्थं जन्माभूत् प्रभव जगतां ते रघुकुले
यदर्थस्ते वासो निखिलजगदावास विपिने ।

स धर्मः संसिद्धो दशवदनसंहारविधिना
प्रभातं सञ्जातं कथयति खगानां कलरुतम् ॥ १७ ॥

कौसल्यातनयं प्रफुल्लनयनं कारुण्यनिःष्यन्दनं
सीतामानसराजहंसमनिशं योगीश्वरान्वेषितम् ।
मायामानुषवेषधारिणमजं कैवल्यनाथं विभुं
वन्दे दाशरथिं प्रभातसमये रामं जगन्मङ्गलम् ॥ १८ ॥

विदेहकुलनन्दिनीहृदयमन्दिरे बन्धुरे
विराजितमधोक्षजं जलदमेचकं रोचकम् ।
मनोगतमहारिपुप्रकरदारकं तारकं
प्रभातसमये भजे रघुवरं पुमांसं परम् ॥ १९ ॥

नमो धर्माय महते विश्वकल्याण धारिणे ।
नमः सत्याय शान्ताय श्रीरामाय नमो नमः ॥ २० ॥

## २. श्रीसुब्रह्मण्यसुप्रभातम्

कल्याणानां निधानाय श्रेयःप्रेयोविधायिने ।
सुब्रह्मण्याय महते परस्मै ज्योतिषे नमः ॥ १ ॥

स्वामिन्नशेषभुवनाधिपते नमस्ते
श्रीमन्निलिम्पकुलमौलिमणे नमस्ते ।
धामन्नुहारतपसां गतये नमस्ते
क्षेमाय जागृहि नृणां तव सुप्रभातम् ॥ २ ॥

एतेऽरुणामलरुचः किरणा दिगन्ते
सन्तन्वतेऽरुणभुवो गगनं वितानम् ।
माणिक्यरञ्जितमिवाद्य तवालयस्य
श्रीमत्कुमारभगवन् तव सुप्रभातम् ॥ ३ ॥

देव त्वदीयवचनं महतामलङ्घ्यं
सम्पालयन्नुदित एष सहस्रभानुः ।
कारुण्यपूर्ण ललितेक्षणपूतमेनं
कर्तुं प्रसीद भगवन् तव सुप्रभातम् ॥ ४ ॥

ताराधिपः सहचरीसहितस्त्वदीयां
आशीं वहन्नमृतमंशुभिरोषधीनाम् ।
राजीषु देव परिषिच्य गतोऽस्तभृङ्गं
स्वामिन् समस्तजगतां तव सुप्रभातम् ॥ ५ ॥

विश्वेश ते भवनमेष तमोविहन्ता
भानुः करैः परिमृजन् गणमप्युडूनाम् ।
निर्माल्यमस्य विनुदन्नुपसेवते त्वां
श्रीमत्कुमार जय सम्प्रति सुप्रभातम् ॥ ६ ॥

गायन्ति मञ्जुलरवा विहगाः समोदं
सोमांशुसौम्ययशसो भवतोऽवदानम् ।
हेरम्बसोदर दिशो विशदा निकामं
श्रीमत्कुमार गिरिजासुत सुप्रभातम् ॥ ७ ॥

माता तवाद्रितनया विनयानतं त्वां
बाहूपगूहममरेन्द्रविनूत नेतुम् ।

उत्सङ्गमुत्सुकमना मनसामगम्यं
श्रीमत्कुमार गिरिजात्मज सुप्रभातम् ॥ ८ ॥

यो मृग्यसे मुनिजनैर्गुह हृद्गुहायां
यो राजसे महित वाङ्मनसाभ्यतीतः ।
सोऽद्य स्थितोऽसि पुरतः करुणालयस्त्वं
नेत्रोत्सवाय भजतां तव सुप्रभातम् ॥ ९ ॥

एते हुताशभव, तुम्बुरुनारदाद्याः
गान्धर्वगाननिपुणाः सह वीणया ते ।
गातुं यशोऽम्बरतलं त्वरया श्रयन्ते
श्रेयोनिधे वरद ते भवताद्विभातम् ॥ १० ॥

चञ्चद्भुजप्रहितघोरशरप्रहारैः
क्रौञ्चाद्रिभेदन मदाम्बुसृजां गजानाम् ।
पञ्चास्य तारकपुरोगमदानवानां
पञ्चाननात्मज विभो भवतु प्रभातम् ॥ ११ ॥

वायुर्विशाख सुमसौरभसारवाही
कौमारधारजलशीकरशैत्यशाली ।
वृक्षान्तरेषु मृदुमर्मरशब्दकारी
त्वां सेवते गिरिशनन्दन सुप्रभातम् ॥ १२ ॥

स्नात्वा सरस्युषसि नाथ समागतानां
वेदान् समाहितधिया पठतां मुनीनाम् ।
व्रातो बहिस्त्वदवलोकनकौतुकानां
तिष्ठत्यमेयमहिमन् तव सुप्रभातम् ॥ १३ ॥

एते मृदङ्गपणवानकशङ्खतालाः
स्कन्द त्वदीयविमलोज्वलकीर्तिमालाः ।
वन्दिस्तुतिप्रचितकर्णसुखाः प्रवृत्ताः
सुत्रामवन्दितपदास्तु तव प्रभातम् ॥ १४ ॥

वेदस्तुतामरमुखाखिललोकगीत
प्रत्यक्षदैवत सतां प्रणतार्तिनाश ।
योगीन्द्रसंयमितमानसराजहंस
श्रीमत्कुमार जय जागृहि सुप्रभातम् ॥ १५ ॥

गौरीशलालितवपुर्वसतिः शुभानां
नागेशपूजितपदः पदवी यतीनाम् ।
नाकेश संस्तुतबलोऽसि फलं श्रुतीनां
राकेशमुग्धमुख ते भवतु प्रभातम् ॥ १६ ॥

शक्त्या निगृह्य गुह तारकमिन्द्रशत्रुं
नैशं तमो रविरिवाप्रमितप्रभावः ।
हर्षाश्रुभिः सह सुरैरभिषेचितस्त्वं
श्रीकार्तिकेय विजयी भव सुप्रभातम् ॥ १७ ॥

त्वत्तेज आकलयितुं क इह क्षमेत
स्कन्द त्वदंशमपि वोढुमथोपयाता ।
भागीरथी भगवती क्षुभिता कृशानुः
भग्नश्च भर्गतनयास्तु तव प्रभातम् ॥ १८ ॥

धर्मस्य रक्षणमभीक्ष्य सुरेन्द्रहेतोः
आविर्भवः शरवणे तव बर्हिकेतो ।

क्लेशाब्धिमग्नजननिस्तरणैकसेतो
 श्रीमत्कुमार गुह जागृहि सुप्रभातम् ॥ १९ ॥

उषसि खलु गृणन्तो नाम ते तारकारे
 शरवणभव रम्ये पुण्यतीर्थेऽवगाह्य ।
धृतनवजलकुम्भा द्वारि तिष्ठन्ति भक्ताः
 तव परिचरणार्थं वर्तते सुप्रभातम् ॥ २० ॥

हिमकिरणरुचीनां फुल्लमल्लीसुमानां
 मरकतसमभासां खण्डबिल्वीदलानाम् ।
निकरमिह गृहीत्वा वृन्दमास्ते सुराणाम्
 वरिवसितुमिदानीं बाहुलेय प्रभातम् ॥ २१ ॥

कृतसुरवरबाधं शोकदं सज्जनानां
 यमनियमरतानामन्तकं तारकं तम् ।
निटिलतटविसर्पिभ्रूलताभीमभङ्गं
 हतवत इतमस्तु स्कन्द ते सुप्रभातम् ॥ २२ ॥

शिवसुत शिवदस्त्वं शूरपद्मान्तकस्त्वं
 वरद वरगुणस्त्वं श्रेयसामाकरस्त्वम् ।
सदयनयन भक्तान् पश्य वश्यान् सदास्मान्
 तिमिरमिह विलीनं स्वस्ति ते सुप्रभातम् ॥ २३ ॥

विविधकुसुमवर्णानेष बर्ही कलापान्
 नयनसुभगरूपानुत्किरन् सप्रमोदम् ।
सुरुचिरशितिकण्ठो वोढुमुत्कण्ठते त्वां
 विबुधनिवहवन्द्यं देव ते सुप्रभातम् ॥ २४ ॥

ब्रह्मर्षिगणवन्द्याय ब्रह्मविद्याप्रदायिने ।
सुब्रह्मण्याय शान्ताय ब्रह्मचर्यश्रिये नमः ॥ २५ ॥
वासुकिप्रतिरूपाय प्रणतार्थविधायिने ।
देवसेनासमेत श्री सुब्रह्मण्याय मङ्गलम् ॥ २६ ॥

वेदवेदान्तवेद्याय प्रणवार्थस्वरूपिणे ।
श्रेयः प्रेयो निवास श्री सुब्रह्मण्याय मङ्गलम् ॥ २७ ॥

विनयावनतभक्तान्तरङ्गनाथ निवेदिता ।
सुब्रह्मण्येश्वरस्वामिन्नुतिरेषास्तु ते मुदे ॥ २८ ॥

## ३. श्रीगोम्मटेश्वरसुप्रभातम्

अनुष्टुप्
श्रवणानन्दसन्दायिश्रमणस्तुत्यकीर्तये ।
विन्ध्याचलनिवासश्रीगोम्मटेशाय मङ्गलम् ॥ १ ॥

शान्ताय शमिनाथाय क्षमिणे श्रुतधारिणे ।
दान्ताय मुनये नित्यं तत्त्वनिष्ठाय ते नमः ॥ २ ॥

वसन्ततिलका
विक्रम्य कर्मचयगन्धगजं बलाढ्यं
मूर्ध्नि स्थितं विपुलधैर्यनिधिं मृगेन्द्रम् ।
मन्ये भवन्तमिह संश्रितमद्रिशृङ्गं
श्रीगोम्मटेश्वर विभो कुरु सुप्रभातम् ॥ ३ ॥

गुञ्जन्ति मञ्जु मधुपा निकटेऽम्बुजानां
कूजन्ति कोकिलगणा निवहे कुजानाम् ।
गायन्ति देववनिता भवतोऽवदानं
श्रीगोम्मटेश्वर विभो मम सुप्रभातम् ॥ ४ ॥

सूर्यः सहस्रमपि नम्रतया कराणां
उद्यम्य ते चरणयुग्ममुपैति नन्तुम् ।
धत्तां त्वदीयनयने विकसद्दलानां
लीलां प्रसन्नरमणीयसरोरुहाणाम् ॥ ५ ॥

उग्रेण नाथ तपसा तव तप्तदेहं
शीतांशुभिः शिशिरयन् शशलाञ्छनोऽयम् ।
श्रान्तो विरन्तुमभिकामयते निशान्ते
श्रीगोम्मटेश्वर भवेन्मम सुप्रभातम् ॥ ६ ॥

श्रीपौदनाभिधपुरीपरभागधेयो
ध्येयः सदा भुजबलीश्वरनामधेयः ।
सौन्दर्यतो विजितमन्मथरूपधेयो
देयाद्विभु र्दुरितदूरकरं प्रभातम् ॥ ७ ॥

साकेतनाथवृषनाथतनूभवस्त्वं
चक्रेश्वरानुज भजन् भुजशालिभावम् ।
भ्रातुः परीभवमुदीर्य विधूय भोगं
त्यागी तपश्चरसि मे तनु सुप्रभातम् ॥ ८ ॥

सौभाग्यसारसरसीरुहसोदरस्य
क्रोधारुणस्य विकचीकृतलोचनस्य ।
तेजो विसारि सहितुं तव निःसहायो
भग्नो बभूव भरतो भवतु प्रभातम् ॥ ९ ॥

स्फूर्जद्बलाहकविमुक्तजलोपमेन
प्रक्षोभणेन तव बाहुबलेरितेन ।
आसारसारवशरेण[१] पराजितोऽभू-
च्चक्रेश्वरो भुजबलीश्वर सुप्रभातम् ॥ १० ॥

उग्रप्रभावलयितं विजितारिचक्रं
चक्रेशरोपपरुषीकृतचक्ररत्नम् ।
चक्रे त्वया भुजबलीश कुलालचक्रं
विश्वाभिनन्द्यभुजविक्रम सुप्रभातम् ॥ ११ ॥

दिक्चक्रबालजयलब्धबलावलेपात्
चक्रेशक्लृप्तनिकृतिं व्यवधूय कोपात् ।
सङ्ग्रामरङ्गविजयोऽथ तपोविधानं
लोकोत्तरा तव कृतिः कुरु सुप्रभातम् ॥ १२ ॥

नाभेयनन्दन मुनीन्द्र पुरन्दराद्या
योगीन्द्रवन्द्यचरितानि तवोद्गिरन्ते ।

([१]आसारसारवशरेण-आसाररूपेण सारवेण शरेण । आसारो धारासम्पातः । आरवेण निनादेन सहितः सारवः शरो बाणः । सरय्वा नद्याः इदं सारवम् (अष्टाध्यायी ६-४-१७४) । शरं जलम् । सारवं शरमेव सारवः शर इत्यभेदाध्यवसायः ।)

श्रीगोम्मट प्रथममन्मथ मन्मनःस्थो
मोहं निरासय विभासय सुप्रभातम् ॥ १३ ॥

लेश्यशविशुद्धिमधिगम्य निरस्तसङ्गः
कर्मापि जन्मशतसञ्चितघात्यघाति ।
निर्माय भस्म तपसा धृतसंवरस्त्वं
श्रीगोम्मटेश्वर विराजसि सुप्रभातम् ॥ १४ ॥

वाताशनोर्मितवपुर्विलसल्लताली-
लीढाङ्गशंसिततपोमहिमा यमीन्द्रः ।
वल्मीकभूषितशिरा अचलोऽसि सत्यं
श्रीगोम्मटेश्वर भवेन्मम सुप्रभातम् ॥ १५ ॥

कामं विजित्य तरसा मनसापि वाचा
संज्ञाचतुष्टयमुदस्य निरस्य भोगम् ।
ध्याने रतः परिहृतावधि शुक्लनाम्नि
श्रीदोर्बलीश्वर जयस्यधुना प्रभातम् ॥ १६ ॥

अर्हन् परीषहचयान् विनिहत्य सर्वान्
जित्वेन्द्रियाणि परिहृत्य ततः कषायान् ।
प्राच्ये विराजसि तपोऽपरनाम्नि राज्ये
चिन्मात्रनिर्मलतनुस्तनु सुप्रभातम् ॥ १७ ॥

निर्माय दीर्घतपसास्रवबन्धहानिं
कर्माण्यपास्य जिन निर्जरयाखिलानि ।
निर्वाणसिद्धिमधिगम्य विभासि नित्यं
गीर्वाणवन्दितपदास्तु सुखप्रभातम् ॥ १८ ॥

स्याद्वादवारितविरोधिवचोविलासः
सम्यक्त्वरत्ननिचितोऽद्रिशिरोनिवासः ।
श्रीगोम्मटेश्वर न तेऽस्ति समः समस्मिन्
लोकेऽवलोकय कृपाकलया प्रभातम् ॥ १९ ॥

नानाविधाभिरभिषेकपुरःसराभिः
सेवाभिरार्जयितुमूर्जितपुण्यराशिम् ।
चामुण्डराजपरिकल्पितभव्यमूर्ते
श्रीगोम्मटेश जगतां तनु सुप्रभातम् ॥ २० ॥

आजानुबाहु कुटिलालकमायताक्षं
वक्षोविशालमृषभोत्तमपीवरांसम् ।
उत्तुङ्गमूर्ति तव रूपमवेक्ष्य सर्वो
लोकः स्वमाकलयते गुणतोऽपि खर्वम् ॥ २१ ॥

देव प्रफुल्लसरसीरुहसंनिकाशं
त्रैलोक्यमोहनमृदुस्मितमाननं ते ।
दृष्ट्वापहर्तुमपरत्र न पारयन्ते
चक्षुर्जना जिन तनुष्व सुखप्रभातम् ॥ २२ ॥

मालिनी

अयमुदयति भानुस्तप्तचामीकराभो
विशति च हिमरश्मिर्वारुणीमिन्दुराशाम् ।
कुसुमपरिमलाढ्यो वाति शीतो नभस्वान्
मुनिकुलतिलक श्रीगोम्मटेश प्रभातम् ॥ २३ ॥

धवलितजगतीकां कीर्तिमिन्दुस्तवैकां
जड इह किरणैस्तां जेतुमुद्यन्निराशः ।
अजित विजिततेजा अम्बरश्चापि मुञ्चन्
द्रवति विगतमानो गोम्मटेश प्रभातम् ॥ २४ ॥

द्विचरमसमये त्वं दण्डयोगं कवाटं
प्रतरमथ वितन्वन् पूरणं ज्ञानिगम्यम् ।
त्वचमिव पवनाशः पुद्गलौघं शरीरं
जहिथ चरममीश प्रार्थये सुप्रभातम् ॥ २५ ॥

हरिणी

अरुणकिरणैः सम्भिन्नास्ते स्फुटोपममौक्तिकाः
विशदरुचयो वृक्षाग्रेषु स्थिता उदबिन्दवः ।
दधति सुषमां माणिक्यानां त्वदोष्ठसमत्विषां
प्रभवतु जगद्भद्रायेदं प्रभातमुपस्थितम् ॥ २६ ॥

ललितवलिता मालाः कल्पक्षितिद्रुमकल्पिताः
गगनसरितो वारि क्षीरं सुधार्णवसञ्चितम् ।
द्रुतमुपगतः सौधर्मेन्द्रः प्रगृह्य समर्चितुं
वृषभतनय स्वामिन् पश्य प्रभातमुपस्थितम् ॥ २७ ॥

पृथ्वी

विरागबलसंवृतो भुजबलीश वीर्यार्जितां
प्रभूतविभवान्वितां तृणमिव प्रियाभिर्युताम् ।
त्यजन्निह निजावनीं निखिलनिर्जरायै वर्नी
ययाथ यमिनाथ सम्प्रति विभातमालोकितम् ॥ २८ ॥

अतिजगती

अभिनवपौदनपुरनिलयश्रीः
भवभयसम्भृतजनशरणश्रीः ।
बहुदुरितालिविशरणपदश्रीः
मम सततं हृदि वसतु तपःश्रीः ॥
(अभिनवपौदनपुरम्-श्रवणवेळगोळक्षेत्रम्)

शार्दूलविक्रीडितम्

भास्वद्भ्रूर्भरतानुजो मुनिवरः सौम्यः सुनन्दासुतः
सिंहस्कन्धविभासुरः सुरनुतः शान्तोऽच्युतः केवली ।
धर्मज्ञः प्रियदर्शनः शुभगुणः स्वच्छः स्वयम्भूर्विभुः
कुर्याद्बाहुबलीश्वरः शिवकरो नः सुप्रभातं सदा ॥ ३० ॥

स्तवपरामरसंसदुपश्रुतं श्रवणसम्पुटपेयकथामृतम् ।
श्रवणबेलगोलवास महाद्युते स्तवनमस्तु मुदे महितस्य ते ॥३१॥

अनुष्टुप्

चामुण्डराजसम्पूज्यं पावनाङ्घ्रिसरोरुहम् ।
श्रावकभ्रमरालीढं तावकं समुपास्महे ॥ ३२ ॥

श्रीमद्बेलगोलवासश्रीगोम्मटेशाभिधाजुषे ।
वीतरागाय यतये विश्ववन्द्याय ते नमः ॥ ३३ ॥

नमो बाहुबलीशित्रे श्रीमते धीमते सते ।
अर्हते शमिनां नेत्रे ज्ञानदात्रे नमो नमः ॥ ३४ ॥

आदिनाथतनूजाय क्षोदिताखिलकर्मणे ।
श्रीमद्बाहुबलीशाय क्षेमदायास्तु मङ्गलम् ॥ ३५ ॥

# स्तुतिपद्यानि

# १. श्रीशङ्करभगवत्पादस्तुतिः

नमः श्रीशङ्कराचार्यभगवत्पादमूर्तये ।
विपश्चिद्गीतपूर्णेन्दुकिरणस्वच्छकीर्तये ॥ १ ॥

निर्दोषाद्वैतलक्ष्मीवदनसरसिजोल्लासकर्मांशुमाली
भास्वद्वेदान्तवाणीनयनयुगलनीलोत्पलोन्मेषखेली ।
धर्मद्रोहप्रसक्तप्रतिभटकटुवृक्षावलीदाहकारी
तेजस्त्रैधं दधानो जगति विजयते शङ्करः सद्गुरुर्नः ॥ २ ॥

विद्यां केचन तत्त्वबोधमपरे बुद्धिं विशुद्धां परे
वाग्मित्वं कतिचित् स्तुवन्ति भगवद्भक्तिं स्वधर्मं यतौ ।
औदार्यं तु परे विरक्तिमपरे कारुण्यमन्ये तपः
श्रीमच्छङ्करभारतीयतिपतौ स्त्यायन्ति सर्वे गुणाः ॥ ३ ॥

परं शान्तमास्यं स्थिरं नेत्रयुग्मं
करः साक्षमालः पुरः शिष्यवृन्दम् ।
उरो भस्मलिप्तं वपुर्दिव्यशोभं
स्मितं चन्द्रिकास्मदगुरोः शङ्करस्य ॥ ४ ॥

भास्वत्त्रिवेणीसदृशी त्रिपुण्ड्री
भाले गुरोः कौतुकमातनोति ।
भस्मीकृतैषा गुरुणा गुणत्रयी
तापत्रयी वा किमुपाश्रितानाम् ॥ ५ ॥

ममता शमिता भवतापनुदा
भवता नरता मम चापगता ।

विदितोऽसि गुरो शिव एव भवान्
चरणं शरणं करवाणि परम् ॥ ६ ॥

गाङ्गेयवारि हरिदश्वकरानुरक्तं
संस्पर्शनात्तनुविशोधनकारि दृष्टम् ।
काषायधारि भवदीयवपुर्नराणां
सन्दर्शनात्तु करणत्रयशुद्धिकारि ॥ ७ ॥

सुखमरीचिकया मम ताम्यतो
गुरुवचोऽमृतमेव पिपासतः ।
अधिगतं तदहो त्वदुदीरितं
समधुरं मधुरं मधुनाऽधुना ॥ ८ ॥

विद्वज्जालतपःफलं कथितमाचार्यस्य भाष्यं पुरा
विद्यारण्यतीश्वरैः कविवरैः साधूक्तमेतद्वचः ।
नो चेत्तादृशरम्यवाक्यसुभगं गम्भीरशास्त्रार्थगं
हृद्यं व्यासमुनेरभूदुपगतं विद्वद्भिरेतैः कथम् ॥ ९ ॥

वेदान्तः काव्यमेतद्द्वयमपि गुणतोऽन्योन्यरोधीति बुद्धिं
धत्ते लोको गुरो त्वद्वचनमधुरता येन लीढा न जातु ।
प्रत्यक्षा वैद्यसृष्टे मधुरगुणनिका लेह्यकल्पेऽथ भाष्ये
न्यस्ता संसाररोगप्रशमिनि कृपया सा त्वयाद्य क्व यातु ॥१०॥

ओजस्विनी क्वचिदुदीरितवस्तुवृत्त्या
माधुर्य रञ्जितपदैः क्वचिदुदगतश्रीः ।
किञ्च प्रसादगुणशालिसुवर्णशुभ्रा
वाणी गुरोस्त्रिपथगेव विभाति हृद्या ॥ ११ ॥

वाचां काचित्प्रवहति झरी भक्तिनम्रा स्तवेषु
प्रौढा काचित् प्रखरवचसां खण्डने पण्डितानाम् ।
सौम्या सम्यग्विनयनविधौ शिष्यवर्गस्य धन्या
गङ्गास्रोतःप्रहसनपटुः सद्गुरोः काचिदन्या ॥ १२ ॥

प्रस्थानत्रयभाष्यमद्भुतमभूत्वत्तः समुद्रोपमं
यद्रत्नान्युपजीव्य पण्डितवरैरक्षोभ्यवैदुष्यकैः ।
व्याख्या-वार्तिक-वृत्ति सिद्धिसहितान् निर्माय भूषागणान्
श्रीमच्छङ्करदेशिकेन्द्र रुचिरान् श्रीशारदा भूषिता ॥ १३ ॥

वेदैः सूक्तैः पुराणैः स्मृतिभिरपि महायोगिनस्तेऽनुभूत्या
युक्त्या जाग्रत्सुषुप्तिस्वपनकलितया रज्जुसर्पप्रपञ्चैः ।
अध्यारोपापवादैर्गुरुवर गहनं शुद्धमद्वैततत्त्वं
व्युत्पाद्यास्माकमार्तिं शमयसि करुणासागरः कस्त्वदन्यः ॥१४॥

उपर्युपर्येत्य यदर्थतत्त्वं
जगद्गुरोर्धीर्भृशमालुलोके ।
अतीत्य तद्वैदिकमन्यदीक्षितुं
सुधीर्न कश्चित् प्रभुरस्ति लोके ॥ १५ ॥

स्तोत्रमिदं माल्यनिभं बद्धं निर्गन्धपदकुसुमैः ।
पदयोरर्पितमेवं हृद्यं ते भवतु भक्तिमात्रगुणम् ॥ १६ ॥

विमलहृदयवासं मोक्षलक्ष्मीनिवासं
शुभचरितविलासं मानवाकारभासन् ।
गुरुपरशिवमन्तश्चिन्तयन् सन्तितीर्षुः
कलयतु चिरमेतां वाङ्मयीं पुष्पमालाम् ॥ १७ ॥

# २. श्रीश्रीधरस्वामिभ्योऽर्पिता स्तुतिपुष्पमाला

नमोऽस्तु यतिराजाय प्रणवार्थस्वरूपिणे ।
श्रीधरस्वामिने तुभ्यं वरदापुरवासिने ॥ १ ॥

लोकवन्दितपादाय श्रीकरेक्षणशोभिने ।
शोकतापापहाराय श्रीधराय नमो नमः ॥ २ ॥

चिदम्बरविहाराय काषायाम्बरधारिणे ।
श्रीदत्तप्रतिबिम्बाय श्रीधराय नमो नमः ॥ ३ ॥

निस्सङ्गाय निरीहाय निर्ममाय यतात्मने ।
मायातीताय मुनये परिपूर्णाय ते नमः ॥ ४ ॥

सनातनपथस्थाय स्वात्मारामाय ते नमः ।
विषयेभ्यो निवृत्ताय प्रशान्तमनसे नमः ॥ ५ ॥

त्यागिने योगिने नित्यं निर्वाणसुखभोगिने ।
रागिणे लोककल्याणे यमिने शमिने नमः ॥ ६ ॥

धर्मसंस्थापनार्थाय धर्मध्वजविराजिने ।
कर्मबन्धविमुक्ताय श्रीधराय नमो नमः ॥ ७ ॥

निगृहीताक्षवृन्दाय सुगृहीताक्षमालिने ।
हस्तोपहृतभिक्षाय दक्षाय गुरवेनमः ॥ ८ ॥

कष्टानां दमनायास्तु शिष्टानां कामधेनवे ।
भवतापविशिष्टानां नमस्ते शिशिरांशवे ॥ ९ ॥

अज्ञानतिमिरान्धानां विज्ञानज्योतिषे नमः ।
प्रज्ञानामृततृप्ताय प्रकृष्टमहसे नमः ॥ १० ॥

पदश्रीशोभितायास्तु वाक्यश्रीदत्तसम्पदे ।
मोक्षश्रीधारिणे नित्यं श्रीधराय पुनर्नमः ॥ ११ ॥

विद्वज्जनशरण्याय सज्जनाभयदायिने ।
मज्जतां मृत्युपाथोधौ कर्णधाराय ते नमः ॥ १२ ॥

भस्मीकृतमनोजाय भस्मरुद्राक्षभूषिणे ।
निश्शेषीकृतमोहाय कस्मैचिद् गुरवे नमः ॥ १३ ॥

ज्ञानमुद्राधरायास्तु योगसाक्षात्कृतात्मने ।
भोगरागविदूराय श्रीधराय पुनर्नमः ॥ १४ ॥

वेदशास्त्रानुरोधेन साधुमार्गोपदेशिने ।
वादकौतुकदूराय श्रीधराय नमो नमः ॥ १५ ॥

कारुण्यपूर्णनेत्राय स्मेरवक्त्राम्बुजन्मने ।
भक्तानां भाग्यदायास्तु श्रीधरस्वामिने नमः ॥ १६ ॥

स्मितचन्द्रिकयाच्छिन्न व्यामोहतमसे नमः ।
धृतमानवरूपाय दत्ताय गुरवे नमः ॥ १७ ॥

श्रीसमर्थगुरोः साक्षात् सम्प्राप्तज्ञानभानवे ।
श्रीसज्जनगढक्षेत्र तपःसिद्धाय ते नमः ॥ १८ ॥

नारायणात्मजायास्तु नमो नारायणात्मने ।
कमलातनयायास्तु नमो विमलचेतसे ॥ १९ ॥

नमः संसारकान्तारसञ्चारक्लान्तबन्धवे ।
जन्ममृत्युजराग्राहनिग्रहव्यग्रकर्मणे ॥ २० ॥

प्रसन्नवदनायास्तु विपन्नार्तिप्रमाथिने ।
प्रपन्नकल्पवृक्षाय श्रीधरस्वामिने नमः ॥ २१ ॥

समाय सर्वभूतेषु क्षमाया निधये नमः ।
समाहितात्मने तुभ्यं श्रीधरस्वामिने नमः ॥ २२ ॥

सन्ततप्रणवध्यानस्नानशुद्धात्मने नमः ।
रामनामसुधापुण्यपानतुष्टात्मने नमः ॥ २३ ॥

अद्वयात्मप्रबुद्धाय वरदाद्रिविहारिणे ।
शुद्धाय सिद्धिदायास्तु श्रीधराय नमो नमः ॥ २४ ॥

निखिलहृदयवासं मोक्षलक्ष्मीनिवासं
शुभचरितविलासं मानवाकारभासम् ।
गुरुमविरतमन्तश्चिन्तयन् सन्तितीर्षुः
कलयतु चिरमेतां वाङ्मयीं पुष्पमालाम् ॥ २५ ॥

## ३. श्रीगुरुस्तुतिसप्तकम्

कैलासाद्रिसितोन्नतद्विपरदप्रोत्कीर्णसिंहासने
भास्वद्भालविभूतिभस्ममुषितस्वर्गापगाविभ्रमम् ।
सन्ध्याम्भोदनिभाम्बरद्युतिपरावृत्तार्द्रदन्तित्वचं
भ्राजन्तं गुरुराघवेन्द्रमपरं शम्भुं शुभाङ्गं नुमः ॥ १ ॥

चिन्मुद्राविनिवारिताखिलजगज्जीवेशभेदभ्रमं
रुद्राक्षाक्षरलक्षितौपनिषदश्रीमण्डितोरोगलम् ।
स्मेरास्योदितचन्द्रिकाशमितसंसारान्धकारोदयं
नामं नाममहो महोऽन्वहमहं मोहाहिमुक्तोऽभवम् ॥ २ ॥

जगदिदमतिचित्रं कल्पितं चित्तभित्तौ
अवितथमिति मत्वा शोकमोहप्रलोभैः ।
कलुषितचरितं मां बोधयन् ब्रह्म सत्यं
गुरुवर इह वन्द्यो राघवेन्द्रो यतीन्द्रः ॥ ३ ॥

गृहसुतधनदाराः कारकाश्चित्तशान्ते-
रिति विकलमतीनामिन्द्रियार्थे रतानाम् ।
श्रुतिवचनसहस्रैर्मार्जयन् मोहलिप्तिं
स जयति गुरुराजो राघवेन्द्रो यतीन्द्रः ॥ ४ ॥

मम मनसि सदास्तां रक्तवस्त्रं महास्त्रं
भवगहनविदारं ज्ञातवेदान्तसारम् ।
अचलनियमनिष्ठं व्याघ्रचर्मासनस्थं
महितममिततेजस्तीर्थहळ्ळीमठस्थम् ॥ ५ ॥

निखिलभुवनगोप्तुः पावनं चन्द्रमौलेः
हृदयमुकुरबिम्बे स्वर्पितं दिव्यरूपम् ।
तमहमितिमनीषाभावितं पूजयन्तं
गुरुवरमिह भक्त्या विस्मितः स्तौमि नित्यम् ॥ ६ ॥

श्रीमत्कर्णाटलक्ष्मीवदनसरसिजोल्लासकर्मांशुमाली
भास्वद्वेदान्तवाणीनयनयुगलनीलोत्पलोन्मेषखेली ।
धर्मद्रोहप्रसक्तप्रतिभटकटुवृक्षावलीदाहकारी
तेजस्त्रैधं दधानो जगति विजयते सर्वतः सद्गुरुर्नः ॥ ७ ॥

## ४. श्रीविद्यारण्यस्तुतिः

शङ्करभगवत्पादैः श्रौते यस्मिन् पदं निदधे ।
तत्पदसंयात्रेऽहं विद्यारण्याय ते नमो विदधे ॥ १ ॥

कृत्यं महदीऽयं श्रीशङ्करगुरुराट् पुरा कृतवान् ।
शिष्टं पुनरवतीर्णो विद्यारण्याख्यया व्यतनोत् ॥ २ ॥

सम्यग् राज्याधिकारेऽपि शक्तं ब्रह्मविदां वरम् ।
वन्देऽहं विशदप्रज्ञं विद्यारण्ययतीश्वरम् ॥ ३ ॥

तुरुष्कसेना दौर्जन्यं जन्यैरेव चिकित्सितुम् ।
विद्यानगरसाम्राज्यं प्राज्यं सृष्टवते नमः ॥ ४ ॥

न क्वापि श्रुतपूर्वमद्भुतमिदं यत् कोऽपि विप्रो धने
हीनश्चैकक एव निश्चितमतिः सङ्कल्प्य कृत्यं महत् ।
सम्पाद्याखिल साह्यसम्पदमहो ! अस्थापयद्दुर्दमं
साम्राज्यं भुवि धर्मरक्षणधिया न स्वार्थलेशेप्सया ॥ ५ ॥

ब्रह्मक्षत्रसमिद्धबुद्धिविभवप्रोद्भूत तेजोबलात्-
उद्वेलोग्र तुरुष्कसैन्य जलधिं संस्तभ्य दूराच्चिरम् ।
वेदं शास्त्रमथोद्दधार सकला यो भारतीयाः कलाः
विद्यारण्ययतीश्वरं नमत भोस्तं नूतनं शङ्करम् ॥

आचार्यः शङ्करो ज्ञाने राजनीतौ बृहस्पतिः ।
वसिष्ठः कर्मकाण्डेषु विद्यारण्यो महामुनिः ॥ ६ ॥

# रूपकाणि

# १. श्रीबाहुबलिविजयम्

## कथासंक्षेपः

### पूर्ववृत्तम्

अयोध्याधिपतिः श्रीवृषभेश्वरः केवलज्ञानं प्राप्य पश्चादादि-तीर्थङ्कर इति प्रसिद्धिं गतः । पूर्वमयोध्यां शासतस्तस्य शतं पुत्राः द्वे पुत्र्यौ च बभूवुः । तेषु भरतो ज्येष्ठः यः किल यशस्वत्यां सम्बभूव । बाहुबली तु सुनन्दायां जज्ञे । उभावपि चरमदेहधारिणौ । श्रीवृषभेश्वरः सर्वेभ्योऽपि पुत्रेभ्यः साम्राज्यं यथायथं विभज्य दत्वा तपसे निर्जगाम । अयोध्यायां भरतः, पौदनपुरे बाहुबली च राज्यं शशासतुः । एवं स्थिते भरतेश्वरस्य कोशागारे चक्ररत्नं, दण्डरत्नं, पुरोहितरत्नम् - इत्यादीनि चतुर्दशरत्नानि प्रादुर्बभूवुः । तेषु चक्ररत्नं प्रधानं, यदवलम्बेन भरतश्चक्रेश्वर इति प्रथामवाप । स च चक्ररत्नं सम्पूज्य दिग्विजयार्थं प्रस्थाय समस्तभूमण्डलं जित्वा प्रतिनिवृत्तः, राजधानीं प्रवेष्टुमुद्युक्तः ।

### प्रथमाङ्कः

सूत्रधारो नट्या सम्भाषमाणः नाटकाभिनयं प्रस्तौति । ततो भरतः पुरोहितरत्नेन सह प्रविशति । दिग्विजयं प्रस्तुत्य समुद्रस्य तरणं, व्यन्तरेशपराजयः, वज्रकवाटभेदनं, तमिस्रागुहावृत्तं, बलाकावर्तकसमुदीरितघोरवृष्टेश्छत्ररत्नेन निवारणं, वृषभाद्रौ कीर्तिप्रशस्तिसमुट्टङ्कनम् - इत्यादिवृत्तान्तमुभौ स्मरतः । ततो

राजधानीप्रवेशावसरे चक्ररत्नं द्वारे स्खलितं नन्तःप्रविशतीति नेपथ्ये समुद्घोषः । सर्वेषां विस्मयः । चक्रेश्वरो गणबद्धदेवोक्तिमाकर्ण्य चक्ररत्नस्खलननिमित्तं पुरोहितेन सह समालोचयति । ''भरतेश्वरस्य भ्रातरो भरतस्य न भवन्ति विनेयाः । अतः सर्वविजयो न जातः'' इति पुरोहितस्य कथनम् । भरतस्य क्रोधः । सर्वे भ्रातरः शरणमागच्छन्त्विति भरतो राजशासनं श्रावयति । भरतस्य शासनं श्रुत्वा बाहुबलिनं विना अन्ये भ्रातरः परमवैराग्यमापन्नाः । राज्यं परित्यज्य तपश्चरितुं गता इति प्रतिनिवृत्तो दूतः कथयति । संरब्धो भरतेश्वरस्तु बाहुबलिनं प्रति महासन्धिविग्रहिणं दक्षिणाङ्कं प्रेषयति ।

## द्वितीयाङ्कः

बाहुबलिमहाराजस्य आस्थानम् । दक्षिणाङ्कस्य तत्रागमनम् । स च भरतेश्वरस्य दिग्विजयवृत्तान्तं प्रस्तुत्य भरतप्रेषितानि रत्नाभरणानि राज्ञे समर्पयति । भरतप्रेषितं पत्रञ्च वाचयति । 'विनम्रेण भूत्वा बाहुबलिना चक्रेश्वरः शरणमुपगन्तव्य' इति पत्राशयं विदित्वा बाहुबलिनः क्रोधः । दक्षिणाङ्कस्य समाश्वासनवचनानि धिक्कृत्य बाहुबलिनः समरोद्योगः ।

## तृतीयाङ्कः

भरतेश्वरस्य सैनिकौ प्रविशतः । पुनरपि सम्भावितं सङ्ग्रामं विचिन्त्य विषादेन विलपतः । ततस्तृतीयः सैनिकः प्रविश्य ''भरतेश्वरबाहुबलिनोश्चतुरङ्गसङ्ग्रामो न भविष्यति, किन्तु धर्मयुद्धं

भविष्यति'' इति कथयति । धर्मयुद्धं प्रवर्तते इति नेपथ्ये समुद्घोषः ।

भरतो बाहुबली च प्रविशतः । दृष्टियुद्धं, जलयुद्धं, मल्लयुद्धश्चेति त्रिप्रकारकं युद्धं प्रवर्तते । खेचर्यौ प्रविश्य युद्धप्रकारं विवृणुतः । धर्मयुद्धे भरतः पराजितो भवति । क्रुद्धो भरतः सहसा चक्ररत्नं प्रयुङ्क्ते । तच्च सरभसं गत्वा हततेजस्कं बाहुबलिसमीपे तूष्णीं तिष्ठति । भरतो लज्जया विषीदति ।

सर्वमिदं विचिन्त्य बाहुबलिनो महद्वैराग्यमुपजायते । समरविजयी सन्नपि साम्राज्यं परित्यज्य भरतमापृच्छय तपसे समवसरणभूमिं प्रयाति ।

ततः प्रविशतः खेचर्यौ । बाहुबलिनस्तपोवृत्तान्तं कथयतः । नेपथ्ये बाहुबलिमुनीन्द्रस्य प्रतिमायोगस्थितेः कथनम् । खेचरीभ्यां मुनीन्द्रस्य वर्णनम् । तस्य केवलज्ञानं नाद्यापि सम्पन्नमिति तयोर्विस्मयः । तद्विज्ञानाय भरतस्तीर्थङ्करसमीपं गतवानिति प्रकटनम् ।

भरतेश्वरः प्रविश्य बाहुबलिनं पूजयति । मानकषायस्त्यक्तव्य इति बाहुबलिमुनीन्द्रं सम्बोध्य भरतो निवेदयति । ततो बाहुबली संवलनकषायं परित्यज्य आत्मध्याने स्थिरो भवति । केवलज्ञानमुदेति । जयकारेण सह देवदुन्दुभिः । भरतेश्वरेण बाहुबलिमुनीन्द्रस्य स्तवनम् ।

# चतुर्थाङ्कः

गङ्गवंशराजस्य राजमल्लस्य मन्त्री चामुण्डराजः जनन्या काळलादेव्या सह प्रविशति । बाहुबलीश्वरस्य प्रतिमा भरतेश्वरेण पौदनपुरान्तिके प्रतिष्ठापितेति पुराणेषु श्रुतवती काळलादेवी तां प्रतिमां द्रष्टुमुत्कण्ठमाना स्वाशयं पुत्राय कथयति । चामुण्डराजो जनन्या इच्छां पूरयितुकामः स्वगुरूणां नेमिचन्द्रमुनीनामनुग्रहं लब्धुं श्रवणबेळगोळक्षेत्रं जनन्या सह गच्छति ।

श्रवणबेळगोळक्षेत्रे श्रावकैः सह नेमिचन्द्रमुनीनां प्रवेशः । अवसरं प्राप्य चामुण्डराजेन काळलादेव्या आशायाः निवेदनम् । बाहुबलिप्रतिमाया अद्यत्वे दुर्दर्शतां नेमिचन्द्रमुनयः कथयन्ति । उपवासादिव्रतैर्जिनेश्वरस्तत्रैव सेवनीय इति च आदिशन्ति ।

मासत्रयमुपवासव्रतं चरित्वा चामुण्डराजो धनुर्धरः प्रविशति । स्वप्ने कूश्माण्डिनीनाम्न्या यक्ष्याः कथनमनुसृत्य पर्वतशृङ्गं लक्षीकृत्य शरं मुञ्चति । पर्वतशृङ्गे बाहुबलिमूर्तिराविर्बभूवेति नेपथ्ये समुद्घोषः । देवदुन्दुभिः ।

चामुण्डराजेन पर्वते सोपानरचनार्थं मूर्तेरुज्ज्वलीकरणार्थञ्च कर्मकरेभ्य आदेशः । ततो महतोत्सवेन नेमिचन्द्रमुनयः काळलादेवी, चामुण्डराजश्च प्रविशन्ति । श्रीगोम्मटेश्वर इति नामकरणम् । श्रीगोम्मटेश्वरस्य स्तवनम् ।

## पात्राणि

**प्रथमाङ्के—**

१. सूत्रधारः
२. नटी
३. भरतः
४. पुरोहितः
५. दूतः
६. गणबद्धदेवः
७. प्रतीहारी
८. राजदूतः

**द्वितीयाङ्के—**

१. बाहुबली
२. अमात्यः
३. दक्षिणाङ्कः
४. प्रतीहारी

**तृतीयाङ्के—**

१. सैनिकाः (त्रयः)
२. भरतः
३. बाहुबली
४. खेचर्यौ

**चतुर्थाङ्के—**

१. चामुण्डराजः
२. काळलादेवी
३. नेमिचन्द्रः
४. श्रावकाः
५. कार्मिकाः पञ्चषाः

### प्रथमोऽङ्कः

(नान्द्यन्ते सूत्रधारः)

सौधर्मेन्द्रमुनीन्द्रवन्दितपदद्वन्द्वः समस्तश्रियां
स्वामी बोधनिधिश्चराचरगुरुः कैवल्यलक्ष्मीप्रभुः ।
दिव्यध्वानविविक्तधर्मविभवो भव्यालिभव्यप्रदः
कुर्यात् सौख्यमुदारमुज्ज्वलतपःश्रीरादितीर्थङ्करः ॥ १ ॥

(पुष्पाणि विकीर्य)

**सूत्रधारः**— आर्ये, इतस्तावत् ।

**नटी**— (प्रविश्य) आर्य, इयमस्मि ।

**सूत्रधारः**— आर्ये, परमपूज्यैः एलाचार्यैः श्रीविद्यानन्दमुनीश्वरै-रादिष्टोऽस्मि— निखिलभुवनवन्दनीयचरपस्य श्रीगोम्मटेश्वरस्य सहस्रवर्षीयमहामस्तकाभिषेकोत्सवे समुपस्थितानां भक्तानां मनोविनोदाय किमपि प्रेक्षणीयकं प्रस्तूयताम्— इति । तत् केन खलु प्रेक्षणीयकेन आराधनीयाः सामाजिकाः ?

**नटी**— आर्य, प्रस्तुतोचितेन श्रीगोम्मटेश्वरचरितसम्बन्धिना केनापि रूपकेण ।

**सूत्रधारः**— युक्तमभिहितम् । (स्मृतिमभिनीय) ज्ञातम् । अस्ति श्रीबाहुबलिविजयं नाम रूपकम् ।

> **पाणिनीये महाशास्त्रे साहित्ये भरतागमे ।**
> **परिणीतमतिश्चक्रे रङ्गनाथकविः कृतिम् ॥ २ ॥**

अनेन सामाजिकानाराधयामः ।

**नटी**— आर्य, प्रथितयशस्कानां पुरातनकवीनां कृतीरतिक्रम्य वर्तमानकवेः कृतौ क इवादरः ?

**सूत्रधारः**— आर्ये, मा मैवम् । पश्य—

> **सौगन्ध्यस्यन्दिकुन्दादौ बन्धुरे कुसुमोत्करे ।**
> **जाग्रत्यपि गुणी लोकश्चन्दने किमु मत्सरी ॥ ३ ॥**

किञ्च

> **नायकगुणबहुमानादप्यल्पः संश्रितो जयति ।**
> **ननु शम्भुजटावर्ती क्षीणोऽपि शशी सभाजितो भवति ॥ ४ ॥**
> (जिनचरणसमाश्रयणात् यक्षोऽपि यथा सभाजितो भवति)

अपि च,

**श्रीमज्जिनसेनार्यैः पम्पेन तथा महाकविना ।**
**निर्मलकाव्यनिबद्धौ शब्दार्थावत्र योजितावुचितौ ॥ ५ ॥**

ननु महाजनपरिगृहीतोऽयमर्थः प्रशंसनीयतां भजते ।

**नटी**— युज्यते ।

(नेपथ्ये-विजयतामयोध्याधिपतिर्भरतेश्वरो विजयताम्)

**सूत्रधारः**— अहो, प्रस्तुतमेव भरतागमकोविदैर्नटैः । आगम्यताम्, अनन्तरकरणीयाय सज्जीभवावः ।

(ततः प्रविशति भरतः सपुरोहितः )

**स्तुतिपाठकः** — विजयतां समस्तराजन्यमस्तकन्यस्तचरणपल्लवो राजाधिराजश्चकरत्नेश्वरो भरतेश्वरः । विजयतां पुरुपरमेश्वरतनूभवोऽयोध्याधिपतिर्भरतेश्वरः । विजयताम् ।

**भरतः**— पुरोहितरत्न, मम दिग्विजयप्रस्थानेन समस्तभूभृतो वशीकृताः । यस्य मे,

**गोष्पदेन समो जज्ञे कल्लोलास्फालितोऽम्बुधिः ।**
**सौधसोपानसदृशी विषमा वज्रवेदिका ॥ ६ ॥**

**पुरोहितः**— अहो, चक्रेश्वरस्य विक्रमोत्कर्षः ।

**करालकुलिशोद्भटच्छटचटारवस्फूर्जितं**
**विशालमतिगह्वरं विषमवज्रवप्रोत्कटम् ।**
**कवाटपुटमद्भुतं परमदण्डरत्नाहतं**
**स्फुटद्धटसमं द्रुतं शकलितं शतच्छिद्रकम् ॥ ७ ॥**

**भरतः—** अपि स्मर्यते तमिस्रागुहायां यद्वृत्तम् ?

**पुरोहितः— काकिणीमणिविन्यस्तसूर्याचन्द्रमसोः प्रभा ।**
**तमिस्रध्वंसिनी राजन् स्मृता रोमाञ्चमुल्लिखेत् ॥ ८ ॥**

अपि च,

**बलाकावर्तकोत्सृष्टा घोरा मेघमुखेरिता ।**
**पुष्पवर्षायिता वृष्टिश्छत्ररत्ननिवारिता ॥ ९ ॥**

**भरतः— वृषभाद्रिं समारुह्य शिलायां विनिवेशिता ।**
**नामकीर्तिप्रशस्तिर्मे वज्रलेपायिता चिरम् ॥ १० ॥**

अविलम्बेन साधितं महीमण्डलम् ।

**पुरोहितः—** चक्ररत्नसद्वितीयस्य चक्रेश्वरस्य विजययात्रोत्सवे को नाम सम्भाव्यते विलम्बः ?

**भरतः—** किन्तु पुत्रगर्धिन्या मम जनन्या यशस्वत्याः खलु दर्शनोत्सवे समभूद् विलम्बः । उत्कण्ठते मे चित्तमम्बां प्रेक्षितुम् । (विलोक्य) हन्त । अयोध्यापुरनिकटमनुप्राप्ताः स्मः । चक्ररत्नं पुरस्कृत्य यावत् प्रविशामः ।

(नेपथ्ये)

**जितसर्वक्षत्रचक्रं शकलितनिखिलारातिनाराचचक्रं**
**चकितक्ष्मावीरचक्रं प्रतिहतखरतेजोंऽशुमाल्यंशुचक्रम् ।**
**नतपृथ्वीपालचक्रं ज्वलितदशहरिचक्रमत्युग्रदीप्ति-**
**क्षतविद्युच्चक्रमासीत् प्रतिहतगति पुर्यन्तिके चक्ररत्नम् ॥११॥**

(सर्वे ससम्भ्रममाकर्णयन्ति)

**भरतः—** (सोद्वेगम्) आः । किमेतत् ?

(पुनर्नेपथ्ये तदेव पठ्यते)

(ततः प्रविशति ससम्भ्रमं दूतः)

**दूतः—** महाराज, महाराज !

**भरतः—** अलमलमावेगेन । निश्शङ्कमभिधीयताम् ।

**दूतः—** चक्रम् ....... चक्रेश्वर !

**भरतः—** चक्रम् । ततस्ततः ।

**दूतः—** चक्रं नगरोपान्ते प्रतिष्ठितम् । न खल्वन्तः प्रविशति ।

**भरतः—** (साश्चर्यम्) न खल्वन्तः प्रविशति ! (विमृश्य) क्व वर्तन्ते चक्रसंरक्षका गणबद्धदेवाः ?

(ततः प्रविशत्येको गणबद्धदेवः)

**गणबद्धदेवः—** जयतु जयतु चक्रेश्वरः । चक्ररत्नं संरक्षन्तो वयमनुवर्तामहे । अप्रतिद्वन्द्विचक्ररत्नमिदानीं नगरद्वारि सहसा निश्चलं स्थितम् । न खल्वन्तः प्रविशति ! को नु खलु चक्रेश्वरस्य प्रतिद्वन्द्वी भवितुमिच्छति ? शरण्यं शरणं न गच्छति ? को नु खलु समुद्धतश्चक्रवर्तिनः प्रतापाग्नौ शलभयितुमात्मानम-पेक्षते ? न जानीमः कस्य वा वीरंमन्यस्य दुर्मेधसश्चतुरङ्गबलमद्य भस्मसाद् भविष्यति ।

**भरतः—** अहो ! अप्रतिहतगति सर्वत्र मे चक्ररत्नमयोध्यां न प्रविशतीति चित्रमेतत् । मद्राजधानीं न प्रविशति ! असम्भाव्यमिदमप्रतर्क्यञ्च । (विमृश्य) पुरोहितरत्न, चतुर्दशानां

मदीयरत्नानां प्रथममेतद्बहुमतं मे चक्ररत्नम्, यस्य बलमवष्टभ्य वयं चक्रेश्वराः । यदद्भुतार्चिश्चक्ररत्नम्,

स्फुलिङ्गानुद्वमद्विष्वक् दिशो दश विदीपयत् ।
रजताद्रिगुहां घोरां प्रविवेश निरर्गलम् ॥ १२ ॥

तदिदमयोध्यां न प्रविशति मद्राजधानीम् । विजितभूचक्रवालस्य मे पराभवं पिशुनयतीव । को नु खलु दर्पान्ध इदानीं मृत्युमुखं प्रविविक्षति ? कर्तव्यमुपदेष्टुमर्हति भवान् ।

**पुरोहितः—** चक्रेश्वर, आदिराजः खल्वसि । त्वदुपक्रमं राज्यशास्त्रम् । के वयं नयमुपदेष्टुम् ?

किं कल्पवृक्षस्य फलार्पणेन
स्यादम्बुधेर्वा जलतर्पणेन ।
वाचां विलासेन बृहस्पतेर्वा
दीपेन भानोः किमु दर्शितेन ॥ १३ ॥

तथापि मयि ते सम्भावना मां मुखरयति । जैत्रास्त्रमिदं चक्ररत्नं खरकिरणमण्डलमिव दुर्निरीक्षमपि चन्द्रमण्डलमिव शान्तकिरणमधुना नगरोपान्ते प्रतिष्ठितम् । तदिदमावेदयत्यमित्रसद्भावम् । निर्मूलितबहिःशात्रवस्य ते सद्भावमन्तःशात्रवस्य प्रकटयति ।

**भरतः—** किं किम् ? को नु खलु मे शात्रवोऽन्तर्मण्डले जागर्ति ?

**पुरोहितः—** देव, न खलु शात्रवः, अपि तु शात्रवाः ।

**भरतः—** (सोद्वेगम्) हा ! धिक् !

**पुरोहितः—** देव, पुरुनाथतनयोऽसि । वयमपि पुरुनाथतनया इत्यात्मानं बहुमन्यन्ते तव भ्रातरः ।

**भरतः—** आः । भ्रातरो मे भ्रातृव्याः ?

**पुरोहितः—** नास्त्यत्र महदन्तरम् । मानोन्नतास्ते कमपि शरणं नोपयान्ति । तेष्वपि बाहुबलावष्टम्भो बाहुबली सुमेरुरिव दुर्दमः ।

**भरतः—** (सरोषम्) कथमेतत् ?

**ज्येष्ठानुवर्तिता धर्मो वृषनाथेन देशितः ।**
**ज्येष्ठं मां नानुवर्तन्ते वृषनाथतनूभवाः ॥ १४ ॥**

अनुजापसदाः खल्विमे चक्रेश्वरस्य धर्मतः शासनीयाः ।

**पुरोहितः—** एवं किल ते मन्यन्ते—ज्येष्ठं गुरुबुद्ध्या नमामः, न तु प्रभुबुद्ध्या शरणमुपयामः इति ।

**भरतः— (विहस्य) यावन्न भूतलं सर्वं मत्पादन्यस्तमस्तकम् ।**
**शिरसा धारयेदाज्ञां, न तावच्चक्रिता मम ॥ १५ ॥**

पश्य, अङ्गुल्यग्रेण सर्वेषां शातयाम्येष दर्पम् ।

**पुरोहितः—** महाराज, 'ऋणव्रणाग्निशत्रूणां शेषं नोपेक्षेत' इति नीतिविदामाम्नायः । तत् प्रेषयतु भवान् शासनहरानभीष्टसिद्धये ।

**शरणं त्वां समायान्तु राज्यभोगसुखेप्सवः ।**
**वनं वा शरणं यान्तु त्यक्तसर्वधनर्द्धयः ॥ १६ ॥**

**भरतः—** प्रथमः कल्पः । कः कोऽत्र भोः ?

**राजदूतः—** जयतु महाराजः ।
**भरतः—** सन्देशहरं दूतं समानय ।
**पुरोहितः—** यथाज्ञापयति देवः ।
**राजदूतः—** (प्रविश्य) जयतु चक्रेश्वरः ।
**भरतः—** दूत, इतो मदनुजानुपसृत्य मम वचनादेवमभिधीयताम्— मदीयबाहुबलाद्वशीकृतभूचक्रमिदं साम्राज्यं न खल्वेकभोग्यं किन्तु भ्रातृभोग्यमपि । 'ज्येष्ठो भ्राता पितुः समः' इति धर्मानुशासन-मनुसन्धाय आगच्छत; शिरस्यञ्जलिमाधाय,

> **चक्रेश्वरस्य सर्वत्र विक्रान्तभुजशालिनः ।**
> **विनयान्नमत क्षिप्रं शरण्यं चरणद्वयम् ॥ इति ॥ १७ ॥**

बाहुबलिनं प्रति तु अन्यः शासनहरः प्रेषयिष्यते ।
**राजदूतः—** यदाज्ञापयति स्वामी (निष्क्रान्तः)
**भरतः—** पुरोहितरत्न, न खल्वाकलयामो दायादानां मनीषितम् ।

> **किमेते मन्यन्ते भुजयुगमिदं भूषणफलं**
> **किमाहो सौवर्णाभरणमिति चक्रं विदुरिमे ।**
> **उताहो दण्डेऽस्मिन्नवमतिरथो कुत्सितवपुः**
> **कराले क्रोधाग्नौ शलभयितुमिच्छा हतधियाम् ॥ १८ ॥**

**पुरोहितः—** किं किं न सम्भाव्यते मदान्धेषु ?
**भरतः—** दूतागमनं तावत् प्रतिपालयामः ।
**पुरोहितः—** बाढम् । (निष्क्रान्तौ)
(नेपथ्याभिमुखं गत्वा पुनः प्रविशतः)
**भरतः—** नाद्यापि परापतति शासनहरो दूतः ।

**राजदूतः—** (प्रविश्य) जयतु चक्रेश्वरः ।
**भरतः—** दूत, निरूढः किलास्मदीय आदेशः?
**दूतः—** बाढं निरूढः । चक्रेश्वरस्य शासनमनुजेभ्यो यथायथं प्रतिपादितम् ।
**भरतः—** ततस्ततः ।
**दूतः—** चक्रेश्वरस्य शासनमाकर्ण्य तैः सम्भूय संमन्त्रितम् ।
**भरतः—** किञ्च प्रतिपन्नम् ?
**दूतः—** एवं प्रतिपन्नम्—

**वितीर्णां वृषनाथेन वसुधां परमेष्ठिना ।**
**तनया भुञ्ज्महे कामं, किं तत्र भरतेशितुः ॥ १९ ॥**

**भरतः—** अहो, धाष्टर्यमेतेषाम् । ततस्ततः ।
**दूतः—** ततश्च ।

**पुरुपरमेश्वरतनया अन्यत्र पितुर्विभोः पदद्वन्द्वात् ।**
**नो नमयन्ति शिरांसि, प्रथतां कीर्तिर्वृषेशस्य ॥ २० ॥**

इत्युक्त्वा परमवैराग्यमापन्नाः सकलं राज्यं परित्यज्य तपश्चरितुं समवसरणभूमिं प्रयाताः ।
**भरतः—** (सविस्मयम्) अहो ! इक्ष्वाकुवंशस्य मानोन्नतिः । अहो ! उर्वीतलगुर्वी निर्वेदस्य परा काष्ठा ।
**पुरोहितः—** चक्रेश्वर, तपश्चर्यया भरतेश्वरमेव नमयाम इति तेषां मनीषा ।
**भरतः—** भवेदेवं मनःकल्पितसाम्राज्यं दुर्ललितानाम् ।

(दूतः प्रणम्य निर्गच्छति)

**भरतः—** पुरोहितरत्न, अभिनन्दनीयमग्रजस्य दिग्विजयोत्सवं नाभिनन्दन्ति भ्रातरः । दुःशीलमेतद्दायादानाम् ।

**उदात्तचरितं धीरं कीर्तिमन्तं प्रतापिनम् ।**
**ज्ञातयो ह्यवमन्यन्ते घूका इव दिवाकरम् ॥ २१ ॥**

न च भवत्यस्मादृशां तथा खेदोऽप्रणते द्विषि, यथा दुर्गर्विते ज्ञातिवर्गे गृहाङ्गणपरिवर्तिनि । कथमद्य मानोन्नतं बाहुबलिनं नमयामि ? असौ हि,

**जगतीतलविस्फुरितं मम वीर्यज्योतिरद्भुतं वेत्ति ।**

किन्तु,

**खरकिरणपरामर्शात् सूर्याश्मेव स जातुचिज्ज्वलति ॥ २२ ॥**

सामोपायेन तावत् प्रवर्तिष्ये । यदि साम्ना न नमति, अस्त्येव दण्डः । पुरोहितरत्न, लेखः प्रेष्यतां कुमाराय बाहुबलिने । उन्मयूखप्रभूतरत्नाभरणोपायनो महासन्धिविग्रही दक्षिणाङ्को निसृष्टार्थो लेखमादाय पौदनपुरीं गच्छतु ।

**पुरोहितः—** देव, तथास्तु ।

**इति प्रथमोऽङ्कः**

## द्वितीयोऽङ्कः

(पौदनपुरे बाहुबलिनः आस्थानम्)

(नेपथ्ये)

(विजयतां पौदनपुरवराधीश्वरो बाहुबलिमहाराजः । विजयतां पुरुपरमेश्वरतनूभवो बाहुबलीश्वरः । विजयताम्, विजयताम्)

(ततः प्रविशति बाहुबली सामात्यः)

**बाहुबली—** अमात्य, ननु मदग्रजेन भरतेश्वरेण प्रहितो महासन्धिविग्रही दक्षिणाङ्को मां द्रष्टुकामोऽवसरं प्रतीक्षते ?

**अमात्यः—** एवम्, महाराज, एवम् । देवसन्दर्शनाय किलेदानीं समयो निर्दिष्टः ।

**बाहुबली—** केन खलु नियोगेनायं सम्प्राप्त इति भवान् मन्यते ?

**अमात्यः—** दिग्विजययात्राप्रतिनिवृत्तो भरतेश्वरो विजयवार्तया प्रियानुजमभिनन्दयितुमिच्छति ।

**बाहुबली—** (सस्मितम्) स्पष्टमग्रे भविष्यति !

**प्रतीहारी—** (प्रविश्य) जयतु महाराजः । महासन्धिविग्रही दक्षिणाङ्कः प्राप्तः ।

**बाहुबली—** प्रवेश्यताम् ।

(ततः प्रविशति दक्षिणाङ्कः)

**दक्षिणाङ्कः—** (राजानं निर्वर्ण्य स्वगतम्)

**अहो दीप्तो महातेजा वज्रसारेण वर्ष्मणा ।**
**मर्त्यरूपं मनोहारि क्षात्रो धर्म इवाश्रितः ॥ १ ॥**

मरकतमणिकान्तिर्महानुभावोऽयं चक्रेश्वरस्य अनुरूपोऽनुजः । आश्चर्यम् ! नैतादृशं तेजःस्फुरितं भरतेश्वरस्यापि । (उपसृत्य) जयतु जयतु महाराजः । महासन्धिविग्रही दक्षिणाङ्कः प्रणमति ।

**बाहुबली—** स्वागतं महासन्धिविग्रहिणे आस्यताम् । (पीठं निर्दिशति)

(दक्षिणाङ्कः पीठे उपविशति)

**बाहुबली—** दक्षिणाङ्क, अपि सुखमध्यास्ते भरतेश्वरो राजधानी-मयोध्याम् ? अपि कुशलमग्रजस्य सहराष्ट्रस्य ?

**दक्षिणाङ्कः—** स्वाधीनकुशलश्चक्रेश्वरः । आयुष्मन्तमनुजं शुभाशिषा योजयति ।

**बाहुबली—** पुण्याहमद्य यद्राजकार्यव्यापृतो बहुचिन्तश्चक्रेश्वरो-ऽस्मान् स्मरति । अपि दिग्विजययात्रा निरन्तरायमवसिता ? सर्वत्र नतमौलयो बभूवुर्वसुधेश्वरा इत्युदन्तमाकर्ण्य पल्लवितहर्षा आस्महे ।

**दक्षिणाङ्कः—** अग्रजदिग्विजयोत्सवो महोत्सवो भवत्यनुजस्येति न चित्रम् । संविभाज्यसुखं हि सौभ्रात्रमामनन्ति । राजाधिराज-श्चक्रवर्ती भरतेश्वर इदानीं रत्नाभरणादिपारितोषिकैरायुष्मत्यनुजे प्रसीदति ।

(रत्नकरण्डकमपनीतमुद्रं कृत्वा रत्नाभरणानि प्रदर्श्य अमात्यहस्ते निक्षिपति)

**दक्षिणाङ्कः—** (बाहुबलिनं सम्बोध्य) महाराज, अस्ति किञ्चिदावेदनीयम् । गुरुगौरवाच्छ्रूयताम् । अयं हि भरतेश्वरः पुरुपरमेश्वरस्य केवलज्ञानोदयनिमित्तां पूजां सम्भृत्य, प्राज्य-साम्राज्यकरीं चक्ररत्नपूजां निर्वर्तितवान् ।

**बाहुबली—** श्रुतमेतत् ।

**दक्षिणाङ्कः—** ततश्च चतुरङ्गसेनापरिवृतो दिग्विजयाय निष्क्रातः । गङ्गाद्वारं समुत्तीर्य, पारेसमुद्रं निविष्टस्य व्यन्तरेशस्यावासं शरव्यमकरोत् । व्यन्तरेशो मागधः संत्रस्तः शरणं प्राप्तः । विजयकुमारो वशीकृतः । कृतमालादयो देवा विधेयतां गताः । दण्डरत्नेन वज्रवेदिका निर्भेदिता । मेघमुखविसृष्टा वृष्टिश्छत्ररत्नेन वारिता । सर्वे म्लेच्छाश्चक्रेश्वरस्य दासतां ययुः । गङ्गा सिन्धुश्च देव्यौ रत्नान्युपाहरतां चक्रेश्वराय । समस्तभूभृतः शरण्यं शरणमुपागताः । किं विस्तरेण ?

**घटदासीकृता लक्ष्मीः सुराः किङ्करतां गताः ।**
**जैत्रप्रशस्तिविन्यासो वृषभाद्रौ निवेशितः ॥ २ ॥**

इत्थं भवदग्रजस्य दिग्विजयकथासंक्षेपः । अहो ! भुजबल-महिमा चक्रेश्वरस्य !

**बाहुबली—** अभिनन्दामः खलु वयम् ।

दक्षिणाङ्कः— महाराज, अस्ति च ते भरतेश्वरेण सम्प्रेषितो लेखः ।

(लेखं दातुमिच्छति)

**बाहुबली—** महासन्धिविग्रहिन्, मुद्रामपनीय वाच्यताम् ।

दक्षिणाङ्कः— तथा । (मुद्रामपनीय वाचयति)

स्वस्ति । श्रीवृषभेश्वरकृपोदञ्चितचक्ररत्नबलसमाक्रान्तसमस्तभूचक्रो भरतेश्वरश्चक्रवर्ती निजप्रियानुजं कुमारबाहुबलिनं परमाशिषा अभिनन्द्य, वीरश्रीविराजितबाहुभ्यां दृढं परिष्वज्य अनुशास्ति ।

**बाहुबली—** किमनुशास्त्यग्रजः ?

**दक्षिणाङ्कः——** (वाचयति)

**मदीयं राज्यमाक्रान्तनिखिलद्वीपसागरम् ।**
**राजतेऽस्मत्प्रियभ्रात्रा न बाहुबलिना विना ॥ ३ ॥**

सकलमानवसुरासुरखेचराश्चक्रेश्वरं प्रणताः शरणमुपगताः । अद्यापि प्रियानुजो बाहुबली चक्रेश्वरं सप्रश्रयं न प्रणमतीति दूयते मनः ।

**बाहुबली——** (सरोषं भ्रुकुटिं बध्नाति)

**दक्षिणाङ्कः——** (वाचयति)

**तदुपेत्य प्रणामेन पूज्यतां परमः प्रभुः ।**
**विमतानामरीणान्तु दण्डः पतति मूर्धनि ॥ ४ ॥**

**बाहुबली——** (सक्रोधम्) अलमलम् । सन्धिविग्रहिन्, अलम् । किमवशिष्टेन वाग्डम्बरेण । तृणच्छन्ने कूपे महागजं पातयितुमिच्छसि, येन विनयाच्छादितं दर्पं श्रावयसि ।

**दक्षिणाङ्कः——** महाराज, युवयोः साङ्गत्येन लोककल्याणमीप्सित-मस्माभिः ।

**बाहुबली——** न हीदानीं किञ्चन हीयते । न वा वयं लोककल्याणं नेप्सामः ।

**दक्षिणाङ्कः——** शमः खलु सम्प्रतिपन्नश्चक्रेश्वरस्य ।

**बाहुबली——** शृणु । प्रतापिनि पुरुषे विमनायिते शमाय न कल्पते साम । स्निग्धेऽपि हि जने तप्ते सर्पिषीवाम्बुसेचनमिदम् । इमानि स्त्नाभरणानि धान्यपलालेभ्योऽपि न मन्यामहे (सविमर्शम्) दण्डमुद्यच्छति किल भरतः । अनेन बाहुदण्डेन षण्डतिलायिष्यते तदीयदण्डरत्नम् ।

**दक्षिणाङ्कः—** महाराज, शाम्यतु भवान् । साम्नि किलाभिप्राय-श्चक्रेश्वरस्य ।

**बाहुबली—** अनुत्थानोपहतं साम परेण दण्डवचनेन बाधितम् । कः खलु मनस्वी पुरुपरमेश्वरपुत्रतामात्मनः ख्यापयन् अन्यं शिरसा प्रणमेत् ?

**दक्षिणाङ्कः—** न चान्यो भरतेश्वरः । ज्येष्ठः किल भवति धर्मतः प्रणम्यः ।

**बाहुबली— ज्येष्ठः प्रणम्य इत्येतत् काममस्त्वन्यदा सताम् ।**
**मस्तकन्यस्तखङ्गन्तु प्रणमेदिति कः क्रमः ॥ ५ ॥**

**दक्षिणाङ्कः—** राजराजश्चक्रेश्वरः प्रणम्य इति सम्प्रदायः ।

**बाहुबली—** राजोक्तिस्तातपादैरुभयोः संविभक्तेति सम्प्रदायः ।

कथमसौ राजराजः ? ज्वलिते घृतसेक इव ते व्याहारः । चक्रेश्वरश्चेति दण्डश्चेति दिग्विजयश्चेति केयं बिभीषिका ? कुलालचक्रमिव चक्रं चारयन् दण्डेन, चक्रेश्वरस्ते कुलालायते । धनार्जनोपायो दिग्विजयव्याजः ।

**दक्षिणाङ्कः—** महाराज, उत्सार्य मात्सर्यं संमानयाग्रजम् ।

**बाहुबली—** हन्त ! वयमेवाभियुज्यामहे ।

**यस्य दौर्जन्यतो राज्याद् भ्रंशिता भ्रातरः स्फुटम् ।**
**धनलोलुपता तस्य मात्सर्यबहुलीकृता ॥ ६ ॥**

ब्रह्मबन्धुरिव धनार्थमुपोषितो दर्भेषु शयितस्ते चक्रेश्वरः । धनं विसृजद्भिरनुकम्पितं किलामरैः । असौ ते स्वामी—

**रत्नपुञ्जेन तुलितस्तुलापुरुषतां गतः ।**
**दैन्यस्य च परां काष्ठां छत्रच्छायां समाश्रितः ॥ ७ ॥**

यच्च वृषभाद्रौ पुरातनमहीश्वराणां नामधेयानि । विलोप्य निजनामोट्टङ्कनं कृतम्, तदेतत् परिहसनीयं बुधजनानाम् । लज्जां पृष्ठतः कृत्वा श्लाघसे भवत्प्रभुम् ।

**विभक्तां गुरुणास्माकं महीमेनां महीयसा ।**
**भ्रातृजायामिवादित्सोर्न लज्जा भरतेशितुः ॥ ८ ॥**

दक्षिणाङ्कः— महाराज (इत्यर्धोक्ते । तं निवार्य)

**बाहुबली—** प्रकटितं वाचस्पत्यम् । कृतं वृथालापैः । नास्ति तेऽर्थसिद्धिः । उच्यतां तव प्रभुरस्मद्वचनेन । चतुरङ्गसेनावरुद्धदिक्-चक्रवालां सङ्ग्रामभूमिमवतीर्णस्य,

**मदकलितमतङ्गैर्दर्पदीप्तैस्तुरङ्गैः**
**पटुभटकटुघोषैर्व्याप्तरोदोऽवकाशैः ।**[१]
**निशितशरकराले कङ्कगृध्रैर्जटाले**
**भुजयुगबललीलां पश्य मे साम्पराये ॥ ९ ॥**

(इति परिक्रामति)

**इति द्वितीयोऽङ्कः**

---

१. (तृतीयान्तानां जटाले इत्यत्र अन्वयः)

## अथ तृतीयोऽङ्कः

(ततः प्रविशतः सैनिकौ)

**प्रथमः—** ही ही ! भाव, ही ही !

**द्वितीयः—** ही ही ! भाव, ही ही !

**प्रथमः—** कति वर्षाणि गृहात् प्रस्थितस्य ! कान्तारेषु आहिण्ड्य आहिण्ड्य रुजया न चलतः पादौ । आमवातपीडिताविव निष्पन्दौ । कटुतिक्तकषायाणि जलानि पीत्वा पीत्वा जिह्वा जडायते । नीरसानि कन्दमूलफलानि खादित्वा खादित्वा जठरपिठरं मडमडायते । कदा मम गृहं प्रवेक्ष्यामि, कदा मम गेहिनी दिग्विजयान्निवृत्तस्य मे मधुरमधुराणि खाद्यानि दास्यति, मोदकैर्लड्डुकैर्वटकैरुपचरिष्यति—इति सततं चिन्तयामि । यदि खाद्यानि नोपाहरिष्यति, तस्या मस्तकं तालीफलमिव शूरोऽहं दण्डेन भञ्जयिष्यामि—इति चिन्तयामि । एवं चिन्तयतो ममैव शिरसि 'पठ्' इति दण्डपातः । चक्रेश्वरो बाहुबलिमहाराजेन सह योद्धुमिच्छति । पुनरपि प्राप्तः सम्प्रहारः । केशाकेशि । मुसलामुसलि । ही ही !

**द्वितीयः—** ही ही ! मम किल कुटुम्बिनीमुखारविन्दं प्रेक्ष्य गृहान्निर्गतस्य कति दिनानि युगानीव गतानि । कदा गृहाय निवर्तिष्ये, कदा वा कुटुम्बिन्यास्तत्तादृशं स्मेरं मुखं प्रेक्षिष्ये, चटुल- संलापैर्विनोदयिष्ये—इति सततं चिन्तयामि । 'इत्थं विचिन्तयति कोशगते द्विरेफे हा हन्त हन्त नलिनी गज उज्जहार' । पुनरपि प्राप्तः सम्प्रहारः । पुनरपि हस्ताहस्ति । खड्गाखड्गि ! ही ही !

**तृतीयः—** (प्रविश्य) अम्हहे ! 'एति जीवन्तमानन्दो नरं वर्षशतादपि' । अम्हहे !

**प्रथमः—** कथमसौ सर्पमुखप्रविष्टो मण्डूक इव वटवटायते ।

**तृतीयः—** अम्हहे,

> **यास्यामि मे गृहं पास्यामि मे सुधाम् (सुराम्) ।**
> **द्रक्ष्यामि मे वधूं वक्ष्यामि मे कथाम् ॥**

**द्वितीयः—** अरे, वध्यगृहप्रवेशितश्छाग इव कथंमेमेकरोषि ? किं ते हर्षकारणम् ?

**तृतीयः—** कुतो न हृष्यामि ? सखे, वृद्धमार्जालमुखादुत्पतितो मूषिक इव हृष्यामि ।

**प्रथमः—** कथय, किङ्कारणम् ?

**तृतीयः—** किमरे नाकर्णितं त्वया ? सम्प्रहारो न प्रवर्तते ।

**प्रथमः—** सम्प्रहारो न प्रवर्तते ! अरे, सत्यमिदम् ?

**तृतीयः—** कथमसत्यं ब्रवीमि ?

**द्वितीयः—** कथय, सखे, कथय विस्तरेण ।

**तृतीयः—** शृणु, बाहुबलिमहाराजस्य धीरोद्धतं वचनमाकर्ण्य चक्रेश्वरेण युद्धमुद्धोषितम् ।

**द्वितीयः—** ततस्ततः ।

**तृतीयः—** ततश्च चक्रेश्वरस्य कुमारबाहुबलिनश्च अमात्याभ्यां मिलित्वा संमन्त्रितम् ।

**प्रथमद्वितीयौ—** किमिति किमिति ?

**तृतीयः—** एवं संमन्त्रितम् ''भरतेश्वरो बाहुबलीश्वरश्च चरम-देहधारिणौ । अनयोर्युद्धं क्रूरग्रहयोरिव लोकविप्लवं जनयिष्यति ।

उभयोरपि चतुरङ्गबल ध्वंसमेष्यति । महती प्राणिहिंसा भविष्यति । अन्यच्च सहोदरयोः सङ्ग्रामो लोकगर्हितः'' इति ।

**प्रथमः—** ततस्ततः ।

**तृतीयः—** ततश्च उभाभ्यामपि गत्वा भरतेश्वरो बाहुबलीश्वरश्च कथञ्चिदनुनयेन भीषणसङ्ग्रामान्निवर्तितौ ।

**प्रथमः—** अम्हहे । वृद्धशृगालयोर्बुद्धिकौशलम् !

**द्वितीयः—** का गतिरिदानीं चक्ररत्नस्य ? नगरस्यान्तः किं प्रविष्टम् ?

**तृतीयः—**शृणु, चतुरङ्गबलसङ्ग्रामो न भविष्यति । किन्तु धर्मयुद्धं भविष्यति ।

**द्वितीयः—** धर्मयुद्धमिति ? किमिदं धर्मयुद्धम् ?

**तृतीयः—** अहिंसापुरस्कृतं धर्मयुद्धम् । यत्र हिंसा न भवति ।

**प्रथमः—** अहिंसा युद्धश्चेति विप्रतिषिद्धम् ।

**तृतीयः—** अनभिज्ञोऽसि । द्वयोरेव प्रवर्तते धर्मयुद्धम् । दृष्टियुद्धं, जलयुद्धं, मल्लयुद्धश्चेति त्रिप्रकारकमिदम् । अस्मिन् धर्मयुद्धे यो जेष्यति स सम्राड् भविष्यतीत्याभ्यामङ्गीकृतम् ।

**प्रथमद्वितीयौ—** युज्यते । प्रियं नः प्रियं नः (सर्वे परस्परमालिङ्गन्ति) ।

(नेपथ्ये)

भो भोः समस्त सामन्तमहीपालाः ।

**चक्रेश्वरस्य दशदिग्विजयोर्जितश्री-**
**विभ्राजमानभुजदण्डयुगस्य जिष्णोः ।**
**भ्रातुश्च विज्वलितदुर्जयदोर्बलस्य**
**प्रक्रान्तमप्रमितविक्रमधर्मयुद्धम् ॥ १ ॥**

तत् समाहिता भवत ।

**सैनिकाः——** (श्रुतिमभिनीय) अये, प्रवृत्तमेव (निष्क्रान्ताः)

(ततः प्रविशतो भरतो बाहुबली च)

(नेपथ्ये 'दृष्टियुद्धं प्रवर्तते' इत्युद्घोषः । उभौ क्रूरया दृष्ट्या परस्परमवलोकयन्तौ मण्डलाकारेण परिभ्रमतः । भरतो मुखं तिर्यगपनयति)

(नेपथ्ये——पराजितो भरतेश्वरः)

**बाहुबली——** अवसितं दृष्टियुद्धम् । अधुना जलयुद्धम् ।

**भरतः——** नदीमवतरावः ।

**बाहुबली——** तथा ।

(उभौ निष्क्रान्तौ)

(ततः प्रविशतो नाट्येन खेचर्यौ)

**प्रथमा——** (नेपथ्याभिमुखमवलोक्य) अहो, गजयूथपाविव गभीरया गत्या नदीं प्रविष्टौ । पश्य सखि, कमलरजःपिशङ्गितमच्छोदक-मन्योन्यं रभसेन सिञ्चतः ।

**द्वितीया——** इन्द्रनीलमणिबन्धुरवर्णो बाहुबलीशः । सुवर्णसवर्णो भरतेशः । पश्य, पश्य, बाहुबलीश्वरः करिशुण्डास्पर्धिना भुजेन जलं सिञ्चन् भरतेश्वरं प्लावयतीव !

**द्वितीया——** भरतेश्वरमुखे ज्वलितं क्रोधानलं मार्जयतीव !

**प्रथमा——** सखि, चक्रेश्वरः पञ्चशतशरासनोत्सेध इति प्रसिद्धिः ।

**द्वितीया——** अथ किम् ? पौदनपुरेशस्ततोऽपि पञ्चविंशत्यधिक-शरासनोत्सेधः ।

**प्रथमा——** अहो !

**भरतेश्वरविक्षिप्ता जलकणिकाः शुभ्रकान्तिरमणीयाः ।**
**बाहुबलीश्वरवक्षसि मुक्ताहारा भवन्तीव ॥ २ ॥**

(नेपथ्ये—पराजितो भरतेश्वरः)

(खेचर्यौ ससम्भ्रमं निर्गच्छतः । ततः प्रविशतो बाहुबली भरतश्च)

**बाहुबली—** अवसितं जलयुद्धम् । इतःपरं मल्लयुद्धम् ।

**भरतः—** तथा ।

(उभौ मल्लयुद्धमभिनयन्तौ निष्क्रामतः)

(खेचर्यौ प्रविशतः)

**प्रथमा—** हन्त, मल्लयुद्धविशारदाविमौ परस्परं समासाद्य,

**मण्डलानि विचित्राणि स्थानानि विविधान्यपि ।**
**सिंहाविव भृशं क्रुद्धौ चरतो जयकाङ्क्षया ॥ ३ ॥**

हंहो ! उत्क्षिप्तो भरतेश्वरो बाहुबलीन्द्रेण ।

**द्वितीया—** अयं हि भरतेश्वरः,

**बलिना बाहुबलिना भुजस्कन्धे प्रसञ्जितः ।**
**स्वर्णाचल इवाभाति नीलरत्नाचले स्थितः ॥ ४ ॥**

**प्रथमा—** किन्नु कारणं तूर्ष्णीं स्थित इव बाहुबलीश्वरः ?

(नेपथ्ये)

**बाहुबली—** भरतेश्वरो मम ज्येष्ठो गुरुश्चक्रवर्ती महाकीर्तिः । न खल्विमं भूतले दूरतो विक्षेप्तुमिच्छामि । शनैर्भूतलमवरोपयामि तावत् ।

(नेपथ्ये—पराजितो भरतेश्वरः)

(ततः प्रविशति विजयी बाहुबली विषण्णश्च भरतः)

**बाहुबली—** अवसितो युद्धप्रकारः । किमतः परम् ?

**भरतः—** (सरोषम्) आः ! (चक्ररत्नं प्रयुङ्क्ते)

(नेपथ्ये—अब्रह्मण्यम् ! अब्रह्मण्यम् ! अनुचितं चक्रेश्वरस्य । अनुचितं चक्रेश्वरस्य ।)

(चक्ररत्नं सरभसं गत्वा बाहुबुलिनं प्रदक्षिणीकृत्य प्रतिहततेजस्कं तस्य पार्श्वे तिष्ठति)

**बाहुबली—** (भरतं प्रति) इदं ते चक्ररत्नं कुलालचक्रायितम् ?

**भरतः—** (अधोमुखस्तिष्ठति)

**बाहुबली—** (ध्यानावस्थितो भूत्वा निःश्वस्य स्वगतम्) अहो ! भरतेश्वरश्चक्ररत्नं मयि भ्रातरि प्रयुक्तवान् । हा धिक् ! राज्यकामनादुश्चरितम्, कीर्तिकामनादुर्विलसितम् । मयापि मद-घूर्णितचेतसा दुर्ललितेन ज्येष्ठेऽविनयः प्रदर्शितः । कामक्रोध-वशीकृतः पुरुषः किं वा नानुतिष्ठति ? इदं हि साम्राज्यमापातमधुरं परिणामे कटु क्षणध्वंसि च । तिष्ठतु तावत् साम्राज्यम्; इदं शरीरमेव विनाशि, सर्वाशुचिनिधानश्च । अस्य शरीरकस्य कृते मूढाः पापानि कुर्वते । विषादपि क्रूरतरा विषयाः । विषं हि शरीरं हन्ति, विषयाः पुनरात्मानमेव घ्नन्तो नयन्त्यधस्तात् । विषमतमानि विषयसौख्यानि को वा मतिमानन्विच्छेत् ?

**बह्वपायमिदं राज्यं त्याज्यमेव मनीषिणा ।**
**यत्र पुत्रा भ्रातरश्च वैरायन्ते परस्परम् ॥ ५ ॥**

**अनिष्टवनितेवेयमालिङ्गति बलाज्जरा ।**
**अप्रतीकारपारुष्यं मरणं शरणं नृणाम् ॥ ६ ॥**

जननमरणदु:षमे संसारकान्तारे सुखजलमरीचिकालोभेन कियत्कालमनुधावनम् ?

**बुद्बुदप्रतिमं राज्यं शाश्वतं मन्यतेऽग्रजः ।**
**निर्बाधं मुक्तिसाम्राज्यं तपसा वरयाम्यहम् ॥ ७ ॥**

(भरतमुपसृत्य) भ्रातः, उत्सृज वैलक्ष्यम् । साहसमनुष्ठितं त्वया । वज्रशैले पतद्वज्रमिव मयि चक्रमिदमकिञ्चित्करम् । अनन्यभोगीनां राज्यलक्ष्मीं मन्यसे । अस्तु, इयं राज्यलक्ष्मीस्तवैव वक्षसि विराजताम् । ज्येष्ठस्य मनःपरिगृहीतां वनितां वसुधाश्रियञ्च को वा बुद्धिमान् कामयेत ? फलितामपि सकण्टकां लतां को वा बाहुभ्यां परिष्वजेत ? निष्कण्टकां निरुपद्रवाञ्च तपःसाम्राज्यलक्ष्मीं वरयितुं प्रव्रजिष्यामि ? क्षम्यतामयमविनयोऽनुजस्य (इति भरतस्य पादयोः पतति)

**भरतः—** (सशोकम्) वत्स—बाहुबलिन् । अविमृश्यकारिणा साहसमनुष्ठितं मया । अनुचितमाचरितम् । क्षम्यतामयं जनः । सर्वेऽपि मदनुजाः तपश्चरितुं गता वनम् ।

**अवशिष्टस्त्वमेवैको मनुवंशधुरन्धरः ।**
**वनं गच्छसि चेद्वत्स जीवन्तोऽपि हता वयम् ॥ ८ ॥**

क इदानीं ते पैतृकं राज्यमनुशासिष्यति ? तद्विरम दुष्करात् । निवर्तय वनगमनबुद्धिम् ।

(भरतो बाहुबलिनं दृढमालिङ्गति । उभौ बाष्पं विसृजतः)

**बाहुबली—** भ्रातः, शिथिलय परिष्वङ्गम् । न खलु शक्नोमि निवर्तयितुं तपश्चरणाध्यवसायम् । आत्मजो मे महाबली पैतृकं राज्यमनुशास्तु, यदीच्छसि । अयं बाहुबली प्रणमति (इति भरतं प्रणम्य निष्क्रामति)

**भरतः—** (सबाष्पम्) किं व्यवसितं भोः किं व्यवसितम् । सर्वे भ्रातरो मां परित्यज्य निष्क्रान्ताः । हा ! (सविषादं चिन्तापरो निर्गच्छति)

(ततः प्रविशतः खेचर्यौ)

**प्रथमा—** सखि, जितचक्रेश्वरो बाहुबलीन्द्रः परमनिर्वेदेन साम्राज्भोगं परित्यज्य समवसरणभूमिं गतवान् । तत्र वृषभेश्वरं जिनेन्दं नानाप्रकाराभिः स्तुतिभिस्तुष्टाव । तदनु तदनुज्ञया जिनदीक्षादीक्षितः सन् द्वादशाङ्गचतुर्दशपूर्वाण्यधीत्य एकविहारी चचार। महीमण्डलम् । अन्ते संवत्सरपर्यन्तं तपश्चरन् प्रतिमायोगेन स्थितवान् ।

(नेपथ्ये)

**पर्यस्तकेशनिचये वनवल्लरीभिः**
**वल्मीकरूढभुजयोर्भुजगावलीभिः ।**
**लीढोऽपि निश्चलवपुस्तपसा यमीन्द्रो**
**नीलेन्द्ररत्नरचितप्रतिमेव रेजे ॥ ९ ॥**

(जवनिका अपसरति । तपसि स्थितो बाहुबली दृष्टिगोचरो भवति)

**प्रथमा—** (निर्वर्ण्य) हन्त, अवसितः संवत्सरः प्रतिमायोगमास्थितस्य मुनीन्द्रस्य ।

**द्वितीया—** नाद्यापि केवलज्ञानमुत्पन्नमिति महान् विस्मयः । किं नु खलु कारणं भवेत् ?

**प्रथमा—** सखि, कारणं प्रष्टुं भरतेश्वरो वृषभदेवान्तिकं प्रस्थितः ।

**द्वितीया—** अस्त्येतत् । पश्य वल्मीकानुपारूढान् ।

**प्रथमा—** पश्य पश्य । उल्लसितफणा भुजङ्गाः सर्पन्ति ।

**द्वितीया—** **इमाः खलु मुनीन्द्रस्य लताः सर्वाङ्गसङ्गिनीः ।**
**पृथक्कृत्य महापुण्यं विचेतुं प्रयतावहे ॥ १० ॥**

**प्रथमा—** प्रथमःकल्पः । (पाश्र्वतोऽवलोकय) अये ! भरतेश्वरः प्राप्तः ।

(उभे निर्गच्छतः) (ततः प्रविशति भरतः)

**भरतः—** (बाहुबलिमुनीन्द्रं विलोक्य) अहो ! तपोनिष्ठा महात्मनः । आदिष्टोऽस्मि पुरुपरमेश्वरेण यथा ''वत्स— भरत, बाहुबली किलैवं मन्यते 'सर्वसङ्गपरित्यागिनापि मया भरतस्य भूतलं चरणाभ्यामधिष्ठितम्' इति । सोऽयं क्षणिकः संज्वलनाभिधो मानकषायः केवलज्ञानोत्पत्तावन्तरायः । तन्निवर्तनाय समुचितमाचर'' इति । इदं समुचितमाचरणम् । (समीपमुपसृत्य बाहुबलिनं पुष्पैरर्चयति । प्रदक्षिणीकृत्य प्रणिपत्य अञ्जलिं बद्ध्वा) बाहुबलिमुनीन्द्र, विज्ञापयाम्यहं भरतः ।

**इयं वसुमती कृत्स्ना त्वद्बाहुबलनिर्जिता ।**
**त्वदीया नास्ति सन्देहश्चित्तं ते स्वच्छतामियात् ॥ ११ ॥**

त्यज मानकषायम् । आत्मानुसन्धाने स्थिरो भव ।

(नेपथ्ये देवदुन्दुभिः । ततः पठ्यते)

**अथ विगतकषायो वीतरागो मुनीशः**
**प्रणिहितमनसात्मध्यानयोगे निमग्नः ।**
**सपदि हृदयबिम्बे निर्मले चित्स्वरूपं**
**दलितभवमुदीतं केवलज्ञानमेकम् ॥ १२ ॥**

(पुनश्च देवदुन्दुभिः)

**भरतः— जयति भुजबलीन्द्रो विश्ववन्द्यो यतीन्द्रो**
**विगलितभवबन्धो लब्धकैवल्यभावः ।**
**शुभकलितसुनन्दानन्दनो नन्दथुं मे**
**चरमतनुधराणामग्रणीः सन्दधातु ॥ १३ ॥**

इति तृतीयोऽङ्कः

## अथ चतुर्थोऽङ्कः

(नेपथ्ये)

विजयतां श्रीमद्गङ्गराज-राजमल्लमहीपालस्य सर्वाध्यक्षः श्रीचामुण्डराजमन्त्रीश्वरः । विजयतां समरधुरन्धरो वीरमार्ताण्डस्त्रिभुवनवीरः सम्यक्त्वरत्नाकरः श्रीचामुण्डराजमन्त्रीश्वरः । मन्त्रीश्वर-महामाता श्रीकाळलादेवी विजयताम् ।

(ततः प्रविशति चामुण्डराजो मात्रा काळलादेव्या सह)

**काळला—** पुत्रक, पुराणेषु श्रुतं मया यत्किल त्रिभुवनवन्दनीयचरणयुगलस्य श्रीमद्बाहुबलिमुनीन्द्रस्य ऐन्द्रनीली प्रतिमा भरतेश्वरेण पौदनपुरान्तिके प्रतिष्ठापितेति । तां द्रष्टुमुत्कण्ठते मे चेतः ।

**चामुण्डराजः—** अम्ब, भवत्या दोहदं दुष्करमिव समर्थये ।

**काळला—** कथं दुष्करमिति ? निरस्तसमस्तशत्रुनिकायस्य त्रिभुवनवीरस्य किमस्ति दुष्करम् ?

**चामुण्डराजः—** अम्ब, दूरः पन्थाः । वर्षीयसी च भवती । कथमध्वश्रमः सहिष्यते ?

**काळला—** पुत्रक, वर्षीयसीत्येव मम मनोरथं पूरयितुमर्हसि । बाहुबलीश्वरं ध्यायन्ती न गणयाम्यध्वश्रमम् ।

**चामुण्डराजः—** (स्वगतम्) अम्बा खल्वेवमाह । असाधारणी भक्तिरस्या जिनेश्वरे । अर्थकामाभ्यामाविष्टस्य गङ्गराजस्य सर्वे मनोरथाः साधिता मया । जन्मदात्र्या मनोरथमेकं कथं न पूरयामि ! इदं हि कार्यं धर्माय च मोक्षाय च । (प्रकाशम्) अम्ब, एवमस्तु । प्रयाणसम्भारः कल्पिष्यते । सपरिवारोऽहं भवतीमनुगमिष्यामि । (विमृश्य) सन्ति किल धवलतीर्थस्य श्रवणबेलगोलस्यान्तिके चन्द्रगिरौ पूजनीया नेमिचन्द्रमुनीश्वराः । तदस्माभिः प्रथमं गुरवो नेमिचन्द्रमुनीश्वरा दर्शनीयाः । तदनुग्रहेण खल्वस्माकं पन्थानः शिवाः सम्पत्स्यन्ते ।

**काळला—** (सहर्षम्) प्रथमः कल्पः । पुत्रक, चिरं जीव ।

(जवनिका पतति)

(ततः प्रविशति नेमिचन्द्रमुनिः श्रावकैः सह)

**नेमिचन्द्रः—** ओं णमो अरहन्ताणम्, णमो सिद्धाणम्, णमो अयिरियाणम्, णमो उवज्झायाणं । णमो ळोए सव्वसाहूणम् ।

**श्रीमत्परमगम्भीरस्याद्वादामोघलाञ्छनम् ।**
**जीयात् त्रैलोक्यनाथस्य शासनं जिनशासनम् ॥ १ ॥**

श्रावकाः, श्रुतो युष्माभिः श्रीमद्बाहुबलिविजयवृत्तान्तः । यथा च भरतेश्वरेण पूजितो बाहुबलिमुनीश्वरः केवलज्ञानमधिगम्य निर्वाण इति । ततश्च,

**भरतेन पौदनपुरे भक्तिप्रवणचेतसा ।**
**श्रीमद्बाहुबलीशस्य प्रतिमा स्थापिता पुरा ॥ २ ॥**

**चामुण्डराजः—**(नमस्कृत्य) मुनीन्द्राः, अस्ति किञ्चिद्विज्ञापनीयम् ।

**नेमिचन्द्रः—** स्वैरमभिधीयताम् ।

**चामुण्डराजः—** इयं हि मे जननी पौदनपुरे प्रतिष्ठापितां बाहुबलिमुनीन्द्रस्य प्रतिमां प्रेक्षितुमुत्कण्ठते ।

**नेमिचन्द्रः—** प्रशंसनीयोऽयमार्यायाः कल्याणाभिनिवेशः । किन्तु अशक्यः पूरयितुम् ।

**चामुण्डराजः—** आचार्याः, कथमिव ?

**नेमिचन्द्रः—** युगान्तरे ननु प्रतिमास्थापनम् । सर्वापि तत्परिसरभूमिरिदानीं कुक्कुटसर्पैराक्रान्ता । कुक्कुटेश्वर इत्येव गीयते तत्र बाहुबली केवली । नासौ मानवैः साक्षात्कारयितुं शकयः । न च मानवैरद्यत्वे दर्शनीया स्वामिनः सा प्रतिकृतिरिति देवानामादेशः ।

**काळला—** (सविषादम्) का गतिः ?

**नेमिचन्द्रः—** आर्ये, भक्तिरेव गतिं दर्शयिष्यति । प्रोषधाद्युपवासव्रतैरिह चन्द्रगुप्तमुनिमन्दिरे समाराध्यतां बाहुबलियतीन्द्रः । प्रसीदति जिनेश्वरः ।

**चामुण्डराजः काळला च—** यथाज्ञापयन्ति गुरवः ।

(जवनिका पतति)

(ततः प्रविशति चामुण्डराजो धनुर्धरः)

**चामुण्डराजः—** अहो ! कल्याणोदर्को गुरूणामादेशः । मासत्रयमाराधितो जिनेश्वरः । रात्रौ किल स्वप्ने यक्षी कूष्माण्डिनी मामाह ''भद्र, भव्यस्ते मनोरथः । प्रसन्नो जिनेश्वरः । नार्थः पौदनपुरगमनेन । अत्रैव साक्षाद् भविष्यति बाहुबलीश्वरः । प्रभाते पुरोदर्शनीयविन्ध्यशृङ्गं लक्षीकृत्य मुच्यतां शरः'' इति । स्वप्नवृत्तान्तं प्रत्यनुमोदितोऽस्मि नेमिचन्द्रमुनीन्द्रैः । एष मुच्यते शरः । (धनुषि शरमारोप्य 'ओं णमो अरहन्ताणं' इति ध्यायन् शरं मुञ्चति । नेपथ्ये महान् शब्दः । ततः पठ्यते)

**चामुण्डराजभुजदण्डसमीरितोऽयं**
**श्रीविन्ध्यशैलशिखरं सहसा बिभेद ।**
**आविर्बभूव सपदि श्रितशैलशृङ्गो**
**भास्वानिवामरगिराविह दोर्बलीन्द्रः ॥ ३ ॥**

(नेपथ्ये - देवदुन्दुभिः) जय बाहुबलीश्वर, जय बाहुबलीश्वर, जय जय जय जय - इत्युद्घोषश्च)

(विस्मितश्चामुण्डराजः नेपथ्यं प्रविश्य सह कर्मकरैः प्रविशति)

**चामुण्डराजः—** शिल्पिवरेण्याः कार्मिकधुरीणाश्च, आविर्बभूव किल बाहुबलीश्वरः करुणया शैलशिखरे चिरेणनरैरनासेवतः शैलो

दुर्गमो भक्तजनानाम् । तद् गण्डशैलान् कण्टकिनो लतापुञ्जांश्च निष्कास्य समीक्रियतां मार्गः । सोपानानि निर्मीयन्ताम् । शिल्पकुशलैः श्रीबाहुबलिमूर्तिरुज्ज्वलीक्रियताम् ।

**कार्मिकाः—** यथाज्ञापयति स्वामी ।

(सर्वे निष्क्रान्ताः)

(तत्रः प्रविशति नेमिचन्द्रमुनिः, चामुण्डराजः, काळलोदेवी च)

(नेपथ्ये महान् मङ्गलध्वनिः, जयघोषश्च)

**नेमिचन्द्रः —** (बाहुबलिप्रतिकृतिं निर्वर्ण्य) चामुण्डराज, धन्योऽसि । प्रसन्नो जिनेश्वरः ।

**चामुण्डराजः—** गुरूणामनुग्रह एषः ।

**नेमिचन्द्रः—** पौदनपुरे कुक्कुटेश्वर इति प्रथिताभिधानो बाहुबलिस्वामी । प्रथममन्मथोऽयं श्रितपर्वतशृङ्गश्चात्र कर्णाटकदेशे श्रवणबेलगोलक्षेत्रे श्रीगोम्मटेश्वर इति प्रसिद्धिं यास्यति ।

**चामुण्डराजः—** यथा पश्यन्ति दिव्यचक्षुषो मुनीन्द्राः ।

**नेमिचन्द्रः—** भवतः कीर्तिराचन्द्रार्कं स्थास्यति ।

**चामुण्डराजः—** अनुगृहीतोऽस्मि ।

**नेमिचन्द्रः—** (काळलादेवीं प्रति) आर्ये ।

**काळलादेवी—** अवहितास्मि ।

**नेमिचन्द्रः—** ननु पूर्णस्ते मनोरथः । किन्ते भूयः प्रियमुपहरामि ?

**काळला—** किमतःपरं प्रियमस्ति ? प्रत्यक्षीकरोमि सौन्दर्यसारं श्रीगोम्मटेश्वरम् । कृतकृत्यास्मि ।

**नेमिचन्द्रः—** तथापीदमस्तु प्रभोः स्तवनम् ।

**श्रीमानुत्तुङ्गमूर्तिः सरसिजनयनः कुन्तलैः कान्तमूर्धा**
**स्मेरास्यः कम्बुकण्ठो विजितमनसिजः शैलवासो विवासाः ।**
**पीनस्कन्धः पुराणो मधुरतरवपुर्वल्लिभिर्वेल्लिताङ्गो**
**धीमानाजानुबाहुर्वितरतु नितरां गोम्मटेशः शुभं नः ॥ ४ ॥**

**काळला—** **सुरेश्वरं निरीश्वरं मदीश्वरं जिनेश्वरं**
**गिरां परं मनीषिणां गिरौ जनाक्षिगोचरम् ।**
**जगत्त्रयीमनोहरं मनस्विनां महत्तरं**
**भजे भवाम्बुधेस्तरिं चिराय गोम्मटेश्वरम् ॥५॥**

**चामुण्डराजः—** **धन्योऽस्मि जन्मशतसञ्चितपुण्यलेशात्**
**कर्णाटके जनपदे विभुराविरासीत् ।**
**श्रीगोम्मटेश्वर इति प्रथितः समन्तात्**
**निर्मायकान् सुमनसः सततं स पायात् ॥ ६ ॥**

इति चतुर्थोऽङ्कः

समाप्तम्

# २. एकचक्रम्

## पात्रपट्टिका

| | | | |
|---|---|---|---|
| १. | सूत्रधारः | ७. | सहदेवः |
| २. | कुन्ती | ८. | ब्राह्मणः |
| ३. | भीमः | ९. | ब्राह्मणी |
| ४. | युधिष्ठिरः | १०. | कन्यका |
| ५. | अर्जुनः | ११. | बालकः |
| ६. | नकुलः | १२. | बकः |

(नान्द्यन्ते सूत्रधारः)

निखिलजगदधीशं सर्वधीसाक्षिभूतं
शबलितगुणयोगात् कल्पिते विश्वरङ्गे ।
निरवधिनवनाट्ये नर्तयन्तं नटन्तं
प्रणमत विभुमाद्यं सूत्रधारं महान्तम् ॥ १ ॥

(पुष्पाणि विकीर्य)

सूत्रधारः — अहो! धन्येयं भारतभूमिः । यैषा —

गिरिवनजलपुष्पैः सर्वतः शोभमाना
मृदुवहपवमाना पावनी रत्नगर्भा ।
शुभचरितविधात्री धर्मशान्त्योः सवित्री
मम हृदयमुपास्ते सौख्यदात्री प्रजानाम् ॥ २ ॥

वेदवेदाङ्गविदुषां समस्तजनकल्याणकाङ्क्षिणां जन्मभूमिरियम् । साधु खल्विदमुच्यते —

**एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।**
**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ॥ ३ ॥**

इति । परन्तु कालमहिमा दुरत्ययः । उत्पद्यते किल जनो यो दुर्मनायते गुणेषु । य एषः सनातनीं सूनृतां संस्कृतवाणीं निन्दति, सौरीं प्रभामपलपति, चान्द्रमसीं पटेनाच्छादयति । भवति किल कण्टकीतरुराम्रवणेषु । भारतजननी सम्प्रति —

**सत्यपि प्राज्यसाम्राज्ये सत्सु प्राज्ञसुतेष्वपि ।**
**दुर्जनैरभिभूतैषा कुन्तीव परिशोचति ॥ ४ ॥**

(निर्गच्छति)

(ततः प्रविशति कुन्ती)

**कुन्ती—** (आत्मगतम्) अहमस्मि कुन्तीभोजेन पालिता कुन्तीति विश्रुता लोके । पितृसङ्केतितं 'पृथा' इति नामधेयं तु जनैर्विस्मृतप्रायम् । शूरसेनमहाराजो मे पिता । मारिषा च माता । हन्त! स्वप्नायितमिव मे पित्रोः स्मरणम् ।

नारीणां सौख्यत्रयमामनन्ति वृद्धाः । शैशवे पितृसौख्यम्, यौवने पतिसौख्यम्, वार्धके पुत्रसौख्यञ्चेति । अहं तु सौख्यत्रयेणापि वञ्चितास्मि मन्दभाग्या । शैशव एव मातापितृभ्यां विरहिता कुन्तीभोजाय दत्तास्मि । यौवने च पाण्डुचक्रवर्तिनः पट्टाभिषिक्ता महिषी क्षणमन्वभवं राजभोगं, विद्युद्विलसितमिव

यामिनी । शापोपहतेन भर्त्रा सह वनाद्वनमटन्ती तेनापि विप्रयुक्ता। वार्धके च गतिरीदृशी ।

हन्त! अस्ति कुरुपितामहः परपुरञ्जयो भीष्मः । अस्ति मे देवरो महामना धृतराष्ट्रः । अस्ति च विद्यागुरुर्द्रोणाचार्यः कृपाचार्यश्च । द्वेधा विभक्तं तु भारतसाम्राज्यं, दायादमात्सर्येण केवलम् ।

पञ्च मे पुत्राः सन्ति देवेन्द्रकल्पाः भरतवंशप्रदीपाः । अहो दैवपारुष्यम् । एकचक्रायामेते भिक्षामटन्ति । कष्टं भोः कष्टम्!

**भाग्यशाली प्रसूतव्यो न शूरो न च पण्डितः ।**
**शूराश्च कृतविद्याश्च मत्पुत्रा भैक्षजीविनः ॥ ५ ॥**

(ततः प्रविशति भीमसेनो भिक्षापात्रहस्तः)

**भीमः**— (सोद्वेगमात्मगतम्)

**जन्मापि वंशे विशदे हिमांशोः**
**दायादता पाण्डुमहीश्वरस्य ।**
**भैक्षेण वृत्तिः परगेहवासः**
**धिग् भीमसेनं धिगिमौ च बाहू ॥ ६ ॥**

(पुनरपि) धिग् भीमसेनं धिगिमौ च बाहू ।

**कुन्ती**— (आलोक्य) सोद्वेग इव लक्ष्यते वत्सो भीमः ।

**भीमः**— साधु लक्षितम् ।

**सवित्री शूराणां कुरुकुलमहीशस्य महिषी**
**स्वपुत्रैरानीते कतिपयगृहेभ्यः प्रतिदिनम् ।**

कदन्ने सन्धत्ते यदि सकुतुकं दृष्टियुगलं
कथं सीमन्तिन्यः प्रसवमभिकाङ्क्षेयुरपराः ॥ ७ ॥

कुन्ती— वत्स, किमवाच्यमभिहितं केनापि कुटुम्बिना ?

भीमः— अवाच्यं वाच्यं वा किमिव चरतां भैक्षमनिशं
प्रहारं हारं वा खर इह समानं गणयति ।
धनुः सज्यं त्यक्त्वा दधति यदिमे पाण्डुतनयाः
कपालं तच्चित्रं दलति न हि तेऽद्यापि हृदयम् ॥ ८ ॥

कुन्ती— (सबाष्पम्) भीमसेन, नूनं वज्रहृदयास्मि मन्दभाग्या ।
भीमः— (सविमर्शम्) अम्ब, अलं रुदित्वा । ननु क्षत्रियासि ।

प्रवृद्धो यः पूर्वं विषमविषदिग्धान्नहविषा
प्रदीप्तो यो लाक्षागृहदहनमित्रेण मरुता ।
समिन्धे क्रोधाग्निर्मम स धृतराष्ट्रस्य तनयान्
खलान् भस्मीकर्तुं, यदि न खलु रुन्धेऽत्रभवती ॥ ९ ॥

कुन्ती— वत्स, क्षमा हि परमं धनम् ।

भीमः— किमिवास्ति भिक्षुकाणामपरं धनम् ?

(ततः प्रविशति युधिष्ठिरः अर्जुननकुलसहदेवैरनुगम्यमानः)

युधिष्ठिरः— सत्यम् ।

सत्यं माता पिता ज्ञानं धर्मो भ्राता दया सखा ।
शान्तिः पत्नी क्षमा पुत्रः षडेते मम बान्धवाः ॥ १० ॥

**भीमः—** (सवैलक्ष्यस्मितम्) समागताः शमिनां धुरन्धराः ।
**युधिष्ठिरः—** वत्स, पाण्डवधुरन्धरो हि भवान् । यस्य बाहुबलमाश्रित्य रक्षिता वयं लाक्षागृहहुताशनात् ।
**भीमः—** सोऽयं रक्ष्यत इदानीं सोदरैरानीतेन भिक्षान्नेन ।
**युधिष्ठिरः—** वत्स, त्यज मानसं कषायम् । दैवं हि दुरतिक्रमम् ।
**अर्जुनः—** दैवं पृष्ठतः कृत्वा पौरुषमाश्रयन्ते पुरुषर्षभाः । पश्य ।

**चापाचार्यस्त्रिभुवनजयी शस्त्रविद्यागुरुर्मे**
**नासारज्ज्वा पशुरिव मया यस्य कारुण्यलेशात् ।**
**कृष्टो युद्धे निखिलबलमुच्छिद्य पाञ्चालराजः**
**सोऽहं धन्वी यदि नरपते, किङ्करं विद्धि दैवम् ॥ ११ ॥**

**युधिष्ठिरः—** अर्जुनः, जानामि ते पराक्रमम् । समर्थोऽसि शत्रुनिबर्हणे । किन्तु पितृव्यस्य धृतराष्ट्रस्याभिमतमविज्ञाय नास्माभिश्चेष्टितव्यम् ।
**नकुलः—** न खलु न विज्ञायते तदभिमतम् । सोऽयं पितृव्यः,
पितेव पालितो येन जन्मान्धश्चक्रवर्तिना ।
तस्यात्मजान् निर्विशङ्कं यो निष्कासितवान् गृहात् ॥ १२ ॥

**युधिष्ठिरः—** वत्स, अस्ति पितामहो भीष्मः । अस्ति च धनुराचार्यो द्रोणः । तौ किलास्माकं हितं द्रक्ष्यतः ।
**सहदेवः—** आर्य, निर्मलं हृदयं किल सर्वमात्मनीनमाकलयति । पश्य ।

**वयं पितृव्यसंमानात् प्रयान्तो वारणावतम् ।**
**मृगा इव वधस्थानं ताभ्यामेवानुमोदिताः ॥ १३ ॥**

**भीमः—** सम्यगाह सहदेवः ।

**कर्तुर्विनिन्दितं कर्म तथा तदनुमोदितुः ।**
**अन्तरं नैव पश्यामि सर्पसौनिकयोरिव ॥ १४ ॥**

**युधिष्ठिरः—** सर्वे भवन्तो विनीताः सुष्ठु मन्त्रयन्ते । परिपालयन्तु भगवतो वेदव्यासमहर्षेर्वचनम् । यदाह तत्रभवानस्माकमेकचक्रानगरवासमुद्दिश्य 'वसतेह प्रतिच्छन्ना समागमनकाङ्क्षिणः' इति ।

**कुन्ती—** युज्यते । पुत्रकाः, आगच्छत । विभजामि भैक्षम् ।

(सर्वे निष्क्रान्ताः)

**॥ इति प्रथमोऽङ्कः ॥**

## अथ द्वितीयोऽङ्कः

(ततः प्रविशति कुन्ती)

**कुन्ती—** (आकर्ण्य) अये! किंनु खलु प्रतिवेशिगृहे रोदनध्वनिरिव श्रूयते । अङ्ग! पश्यामि ।

(ततः प्रविशति ब्राह्मणः, ब्राह्मणी, कन्यका च । त्रयोऽपि संविग्नाः । बालकश्च क्रीडन् प्रविश्य पितराववलोकयति ।)

**ब्राह्मणः—** (सविषादम्) धिक् संसारम् । नास्त्यत्र सुखलेशः । जन्मप्रभृति धर्मे श्रद्धालुना श्रान्तं मया । न स्मरामि जातुचित् धर्मे मम स्खलितम् । कोऽयं धर्मो यो न रक्षति ? यमाश्रित्य महापङ्क

इव गजः सीदामि । मोक्षस्तु नभसः पृष्ठे । (सविमर्शम्) अर्थकामावेव पुरुषार्थौ यदि राजा सम्यक् पालयति । 'राजानं प्रथमं विन्देत् ततो भार्यां ततो धनम्' इत्यस्ति नीतिविदां वचनम्। मया तु विपर्यासितम् । ब्राह्मणि, न त्वया मम वचनं श्रुतं येनेयं विपत्तिः शिरसि निपतिता ।

**ब्राह्मणी—** आर्य, जानासि मे त्वयि भक्तिम् । किं वा दुरनुष्ठितं मया ?

**ब्राह्मणः—** स्मरसि यन्मया नगरादन्यत्र गन्तुं व्यवसितम् ? दुर्बलो दुर्मेधाश्चास्य नगरस्य राजा । अत्र निवासो नास्माकं क्षेमङ्कर इत्यसकृदुक्तं मया । त्वया तु नानुमोदितं, न विमृष्टम् । 'इह जाता विवृद्धास्मि मातापितरौ चात्र निवसतः' इत्युक्तवती त्वम् । अदूरदर्शिनी खल्वसि । अधुना तु—

**स्वर्गतस्ते पिता वृद्धो माता चानुगता पतिम् ।**
**बान्धवा भूतपूर्वाश्च का तवात्र पुरे रतिः ॥ १ ॥**

**ब्राह्मणी—** आर्य, अनुत्तरास्मि । (अश्रूणि मुञ्चति)

**ब्राह्मणः—** साध्वि, शोकनिर्विण्णेन किमपि मया जल्पितम् । मा भूद्विषादः । सर्वदा हि त्वम् —

**सुशीला सत्त्वसम्पन्ना सहधर्मचरी मम ।**
**सखी चापत्यजननी मातेव शुभकाङ्क्षिणी ॥ २ ॥**

पश्य, का गतिरिदानीम् ? यद्यहं बकासुरस्य भक्ष्यो भविष्यामि, को नु त्वां पुत्रौ च पालयिष्यति ? वृष्टिवाताहतं

जीर्णकुड्यमिव शीर्यते कुटुम्बकमिदम् । न चैकाकिनी शक्नोषि धुरं वोढुम् । न खल्वेकचक्रो रथो गच्छति ।

**ब्राह्मणी—** आर्य, अलं चिन्तिया । अहमेव यास्यामि राक्षसनिकटम् ।

**अयं हि परमो धर्मो नारीणां सम्प्रकीर्तितः ।**
**प्राणानपि परित्यज्य यद्भर्तृर्हितरक्षणम् ॥ ३ ॥**

**ब्राह्मणः—** (सकरुणम्) भद्रे, मैवं वोचः ।

**कुमारं कन्यकाञ्चैव प्रसूय कुलतारिणीम् ।**
**दैत्याय चेद् बलिं दद्यां धिङ्मे कृपणजीवितम् ॥ ४ ॥**

**ममैव जीवितस्यार्थे पत्नीं कल्याणिनीं सतीम् ।**
**किं नु जह्यां सुखापेक्षी मतिहीनस्त्रयीमिव ॥ ५ ॥**

कष्टं भोः कष्टम् ।

**ब्राह्मणी—** आर्य, स्त्रीति मन्यमानः सानुकम्पो भूत्वा स दैत्यो मां विसृजेदपि ।

**ब्राह्मणः—** सौम्ये, न हि व्याघ्रो हरिणीमनुकम्पमानो दृष्टः ।

**कन्यका—** अम्ब, श्रूयतां मम वचनम् । तातेन विनाकृता त्वं सत्यं प्राणान् न धारयिष्यसि । युवाभ्यां विहीनाहं नैव जीवितुं शक्ष्यामि । सत्येवं कुतो नु जीवितशङ्का ममानुजे बालके? धर्मतोऽहं कदाचित् परित्याज्यैव । 'अर्थो हि कन्या परकीय एव'। तात, अधुनैव मां परित्यज्य कुलं त्रायस्व । यास्यामि राक्षसमुखकुहरम् ।

(उभौ कन्यकां परिष्वज्य)

**ब्राह्मणः—** मैवं मैवं पुत्रिके,

**नैव श्येनाय दास्यामि प्रियां गृहशकुन्तिकाम् ।**

**ब्राह्मणी—** वत्से,

**कथङ्कारमिदं श्रुत्वा हृदयं मे न दीर्यते ॥ ६ ॥**

(सर्वे रुदन्ति)

**बालकः—** (वेत्रलतामादाय) तात, मा रुदः । अम्ब, मा रुदः । अक्क, मा रुदः । अनेन दण्डेन तं राक्षसं हनिष्यामि ।

(सर्वे बाष्पाणि मार्जयन्तः स्मयमानाः बालकमालिङ्गन्ति ।)

(ततः प्रविशति कुन्ती)

**कुन्ती—** पूजनीय, तपोधन, कुतोमूलमिदं दुःखम् ? तत्त्वतो ज्ञातुमिच्छामि । ज्ञात्वा च प्रतिकर्तुं यतिष्ये यदि प्रभविष्यामि ।

**ब्राह्मणः—** तपोधने, उपपन्नमेतत् सतां यदन्यदुःखसंवेदनम् । इदं दुःखं मानुषेण व्यपोहितुं न शक्यम् ।

**कुन्ती—** विशदय विप्रोत्तम, यदि वाचि न मत्सरः ।

**ब्राह्मणः—** हन्त! वराकस्य मे भागधेयम् । गव्यूतिमात्रे नगरात् बको नाम नरभक्षको राक्षसः प्रतिवसति । वैदेशिकी भवतीति ब्रवीमि । अस्य पुरस्य राजा मन्दधीर्दुर्बलश्च । राक्षसवैयात्यभीतेन राज्ञा तस्मै प्रतिश्रुतम् — प्रतिदिनमाहारं प्रेषयिष्यामीति । शकटपूर्णं मृष्टान्नं, वृषभौ द्वौ, मानुषश्चैक इति दैत्यस्य भोजनकथा। इदं च बकासुरस्य दैनिकं बलिहरणं प्रतिदिनं पौरैः पर्यायतो देयमिति राजनियोगः । स च वारः श्वः प्रभाते ममापतितः । तदेवं दुःखार्णवे मग्नं मम कुटुम्बकम् ।

**कुन्ती—** किमध्यवसितं भवता ?

**ब्राह्मणः—** किमन्यत् ? प्रभाते सपुत्रदारः प्रविशामि राक्षस-कुक्षिम् ।

**कुन्ती—** (सविमर्शम्) न विषादस्त्वया कार्यः । सन्ति मे पञ्च पुत्राः । तेष्वन्यतमं त्वदर्थे प्रेषयिष्यामि ।

**ब्राह्मणः—** (कर्णौ पिधाय) नैवं नैवं तपोधने! नश्वरस्य मम जीवितस्यार्थे किमतिथिं ब्राह्मणं प्राणैर्वियोजयिष्यामि ?

**आगतस्य गृहं घातो नृशंसो लोकगर्हितः ।**
**श्रेयान् सदारपुत्रस्य विनाशोऽद्य मम स्वयम् ॥ ६ ॥**

सर्वथा नानुमन्ये तवाभिसन्धिम् ।

**कुन्ती—** ब्रह्मन्, अवहितमनाः शृणु ।

**ब्राह्मणी—** विरम विरम । न दृष्टा तादृशी सीमन्तिनी लोके या दुष्टमपि पुत्रं परित्यजेत् ।

**कुन्ती—** श्रूयताम् । नास्ति मे कश्चिदनिष्टः पुत्रः । न च कोऽपि धर्मपथाच्चलितः । न च त्यजेयमेकमपि, यदि पुत्रशतं भवेत् । अस्ति मे पुत्रो मन्त्रसिद्धस्तेजस्वी वीर्यवान् । बहुधा तस्य मन्त्रवीर्यं परीक्षितम् । बलवन्तो महाकाया राक्षसास्तेन निहताः मया दृष्टपूर्वाः । स ते राक्षसबलिं तस्मै नेष्यति निहनिष्यति च तं दुरात्मानं निश्चयेन । विश्वसिहि ।

**ब्राह्मणः—** महामातः ।

**न मानुषी वदत्येवं देवता प्रतिभासि मे ।**
**स्थाने मय-ाा तपस्तप्तं येनेदानीं प्रसीदसि ॥ ७ ॥**

**कुन्ती—** रहस्यमेतत् । न कदाचन कस्मैचिदप्याख्यातव्यम् ।

राक्षसं निहतं श्रुत्वा मन्त्रार्थिनो जनाः पुनः मम पुत्रान् स्वार्थाय विप्रकुर्युः । अननुज्ञाता हि गुरुणा मन्त्रविद्या परस्मै न कदाचिदुपदेष्टव्या भवति । सर्वथा गोपनीयमेतत् ।

**ब्राह्मणः—** मम देवते, अनुगृहीतोऽस्मि । सत्यं महात्मनां वचनं 'धर्मो रक्षति रक्षितः' ।

॥ इति द्वितीयोऽङ्कः ॥

## अथ तृतीयोऽङ्कः

(ततः प्रविशति कुन्ती)

**कुन्ती—** मन्ये साध्वनुष्ठितं मया । सत्कृताः सुखं निवसामः खलु तपस्विनो विप्रस्य निवेशने । सदा चिन्तयामि किमस्य प्रियं कुर्यामिति । समुचितोऽयं कालः प्राप्तः प्रत्युपकारस्य । नागायुतबलो मम पुत्रो भीमसेनः । दृष्टं हि तस्य विक्रान्तं जतुगृहे। बलवांश्च हिडिम्बः पिष्टपेषं पेषितः । हनिष्यति मे पुत्रको बकहतकम् । चोदयिष्यामि वत्सं भीमसेनम् । न जाने किं वक्ष्यति युधिष्ठिरः ।

(ततः प्रविशति भीमः)

**भीमः—** (सावेगमात्मगतम्) दुर्योधनहतक, निष्कण्टकं मन्यसे किल हस्तिनावतीप्रभुत्वम् । जतुगृहव्यतिकरेण दग्धानवगच्छसि पाण्डुपुत्रान् । निर्लज्ज, जीवन्ति पाण्डुपुत्राः । जागर्त्ययं

भीमसेनस्तव मृत्युः । गणयस्व दिनानि । (कुन्तीं दृष्ट्वा ससम्भ्रमम्) अये! अम्बा । अम्ब, किमपि गभीरं चिन्तयसीव ।

**कुन्ती—** पुत्रक, दैववञ्चिताया मम चिन्ता भवति सहभूः ।

**भीमः—** अम्ब, न खलु विमनायितव्यं भवत्या । वीरप्रसूरसि । अद्यापि धरते भीमः । व्यपैतु ते शोकः । समयं प्रतीक्षस्व केवलम् ।

**कुन्ती—** जानामि, वत्स, जानामि । सन्ति मे पुत्रा अप्रतिमशूरा गुणशालिनश्चेति प्रत्याशया जीवामि । इदानीमसंमन्त्र्य पुत्रैः सह किञ्चित् साहसं कृतमिति तप्यते हृदयम् ।

**भीमः—** (विलोक्य) मातः, भवत्या वचनमेवास्माकं संमन्त्रणम् । कदाचिदप्यविमृश्य न क्रियते भीमजनन्या । यदि वा कृतं समीकरिष्यते भीमेन ।

**कुन्ती—** पुत्रक, किञ्चित् प्रतिश्रुतं मया प्रतिवेशिने ब्राह्मणाय ।

**भीमः—** सम्यगनुष्ठितम् । आतिथेयः किल तत्रभवान् उपकर्ता वसतिप्रदानेन ।

**कुन्ती—** आकर्णय, अस्य पुरस्यादूरवर्तिनि पर्वते वसति बकनामा दैत्यः ।

**भीमः—** श्रुतं तस्य दुरात्मनो वृत्तम् । पर्यायक्रमेण तस्मै बलि-माहरन्ति पौराः ।

**कुन्ती—** श्वः प्रभाते भवत्यस्य विप्रस्य पर्यायः ।

**भीमः—** बाढम् ।

**कुन्ती—** न चैतावत् । मानुषभोजी स राक्षसः श्रूयते । भोज्य समाहारे मानुषोऽपि तस्मै प्रेषयितव्यः । तस्माद् बालकस्य पिता तपस्वी शोचति ।

**भीमः—** विदितमवशिष्टम् । मत्पुत्रेषु कोऽपि प्रेषयिष्यत इति भवत्या प्रतिश्रुतम् ।

**कुन्ती—** (मौनमवलम्बते)

**भीमः—** मातः, नास्त्यत्र किमप्यनुशोचितव्यम् । क्षत्रियाण्या यदुचितं तदनुष्ठितम् । युक्तोऽयं प्रतिश्रवः । श्रोत्रियोऽयं प्रतिवेशी प्रत्युपकारमर्हति । पश्य —

**चिरं भैक्षप्रदानेन पौरैरुपकृता वयम् ।**
**कृतं प्रतिकृतं भूयादेष धर्मः सनातनः ॥ १ ॥**

अहमेव बकासुरमभिगमिष्यामि ।

**मातस्त्वाशिषा सत्यं पोथयिष्यामि दानवम् ।**
**चिरं जीवन्तु नगरे साधवश्चाकुतोभयाः ॥ २ ॥**

**कुन्ती—** वत्स, भीम, अनुरूपमभिहितं भरतवंशप्रदीपेन मम पुत्रेण । भक्ष्यभोज्यादिकं मृष्टान्नं शकटपूरं पूरयित्वा प्रेषणीयं भवति राक्षसाय । तदेतत् सज्जीक्रियतामिति चोदयिष्यामि ब्राह्मणकुटुम्बम् ।

**भीमः—** अहो! प्रियं मे । सज्जीक्रियताम् । अपरमिदं प्रियमनुष्ठितं मे भवत्या । प्रभूतमुपाहरिष्यते भोजनम् ।

(ततः प्रविशन्ति युधिष्ठिरादयः)

**युधिष्ठिरः—** (विलोक्य) अये! हर्षेण उत्फुल्लाक्ष इव वत्सो भीमः ।

**भीमः—** प्रभूतमुपस्थितं मे भोजनम् ।

**अर्जुनः—** स्थाने खलु प्रहर्षः औदरिकस्य!

**नकुलः—** ओष्ठौ स्फुरत इवाग्रजस्य!

**भीमः—** पश्यत, बाहू अपि स्फुरतः!

**सहदेवः—** अपि हस्तद्वयेन भोक्ष्यसे ?

**भीमः—** तदपि भविष्यति । न केवलं भोजनमुपस्थितम् । आयोधनमपि ।

**युधिष्ठिरः—** आयोधनमिति । केन ?

**भीमः—** बकासुरेण ।

**युधिष्ठिरः—** अम्ब, किमिदानीमुपक्षिप्तम् ?

**कुन्ती—** पुत्रकाः, बकासुरस्य भोजनपरिकल्पनं जानीथ पौराणाम् ।

तदिदानीं पर्यायपतितं प्रतिवेशिनो ब्राह्मणस्य ।

**युधिष्ठिरः—** ततस्ततः ।

**कुन्ती—** स खल्वेकपुत्रस्तपस्वी भृशं परिदेवयते ।

**युधिष्ठिरः—** ज्ञातमवशिष्टम् । मातः, न खलु भवत्या अध्यवसितं समर्थये ।

**कथं परार्थे धीमन्तं तनयं त्यक्तुमिच्छसि ।**
**मोहिता दुःखदोषैस्ते न बुद्धिस्साधुदर्शिनी ॥ ३ ॥**

यस्य वीरस्य भुजबलमाश्रित्य वयं सुखं शेमहे, यच्च चिन्तयन् दुर्योधनो निद्रां न लभते, तस्य भीमस्य प्रेषणं कथं नु त्वया सङ्कल्पितम् ? अहो ! अत्याहितम् । अविमृश्यकारी स्त्रीजनः ।

**भीमः—** धर्मं विजानता भवता धर्मसङ्ग्रहोऽत्र द्रष्टव्यः । नहि मातुराज्ञा प्रत्यादेशमर्हति ।

**युधिष्ठिरः—** वत्स, भीमसेन, बलवान् मानुषभोजी स राक्षस इति श्रूयते ।

**भीमः—** ततः किम् ? राक्षसध्वंसी भीमः स्मर्यते । अलं विशङ्कया । हनिष्यामि तं दुरात्मानम् ।

**अर्जुनः—** धनुर्धरोऽहमनुगमिष्यामि ।

**भीमः—** मा मैवम् । नहि खरदंष्ट्रो मृगाधिपः सहायमपेक्षते ।

**इमौ हि पीवरौ बाहू सहायौ सहजौ मम ।**
**बकं विध्वंसयिष्यामि सिंहः क्षुद्रमृगं यथा ॥ ४ ॥**

**॥ इति तृतीयोऽङ्कः ॥**

## अथ चतुर्थोऽङ्कः

(ततः प्रविशति बकासुरः)

**बकः—** अहह! इदं हि नाम सौख्यं यदनायासेन प्रत्यहं मृष्टान्नभोजनम् । भक्ष्यभोज्यदधिघृतसमन्वितः शकटवाह्य ओदनराशिः, द्वौ वृषभौ, मानुषश्चैकः । सर्वमिदं मम कुक्षौ प्रक्षिपामि । अहह! हसितुमिव इच्छामि । शिखाग्राहं गृहीत्वा एकचक्राया राजा दासीकृतो वराकः । प्रतिदिनं मम भोजनं परिकल्पयति पौरैः । 'अहिंसा परमो धर्मः' इति मूर्खालापः । कथं हि नाम शक्यमहिंसया जीवितुम् ? क्षुधितो व्याघ्रस्तृणानि किं भक्षयति ? सिंहो वा पर्णानि खादति ? सृष्टिकर्तुर्नियम एषः यद् राक्षसकुलजातानां युक्तं मांसभक्षणं नरभक्षणञ्च । नियमं

रक्षन्तीति राक्षसाः । (विचिन्त्य) अहो! ममेदानीमतिक्रामति भोजनकालः । किं नु मय्युदासते पौराः ? (सक्रोधम्)

**किं हन्मि राजपदभाजमसत्यवाचं**
**दग्ध्वाथवा पुरमिदं भसितं करोमि ।**
**किं वाखिलानपि खलान् विनिहत्य पौरान्**
**गोमायुगृध्रनिवहेभ्य उपाहरामि ॥ १ ॥**

(दूरं दृष्टिं निक्षिपन्) हंहो! कश्चिदत्र शकटं वाहयन् उपसर्पति । प्रतीक्षिष्ये तावत् । हा धिक्! कोऽयं पुरुषापसदःपरावृत्य शकटस्थमन्नं भक्षयन्नेव दृश्यते ? (साट्टहासम्) वधाय कल्पितश्छागः पर्णं भक्षयितुमिच्छति! (विलोक्य) अरे! दधिघटं शून्यं कुरुते! पायसं पिबति! लड्डुकान् मुखे निक्षिपति! मर्दयिष्याम्येनम् । रे पुरुष, वाहय शीघ्रम् वाहय शीघ्रम् ।

(नेपथ्ये)

राक्षसापसद । एहि मन्ये ओदनं भोक्ष्यसे । भुक्तमस्माभिः ।

**बकः**— अहो । वृक्षषण्डान्तरितो वराकः । (दन्तान् कटकटापयन्) अरे रे । दन्तांस्ते पातयिष्यामि यदि शीघ्रं नागच्छसि ।

(ततः प्रविशति भीमसेनः)

**भीमसेनः**— ऊर्ध्वमुख, पिशाच, पश्य मां पुरतः स्थितम् ।

**बकः**— मानुषापसद, परिवेषय मे भोजनम् ।

**भीमसेनः**— (सहासमुदरं परिमृजन्) सर्वं परिवेषितं मदीयजठरस्थाय भगवते हुताशनाय ।

**बकः**— हा धिक्,

**एवं प्रगल्भते वक्तुं तृणकल्पो हि मानुषः ।**
**स्पर्धते विन्ध्यशैलेन प्रकटं मृन्मयो घटः ॥ २ ॥**

**भीमसेनः — दृष्टिदोषो महानेषः यन्मां पश्यसि मानुषम् ।**
**मृत्युं पुरः स्थितं विद्धि हन्तुं त्वां धर्मदूषणम् ॥ ३ ॥**

**बकः**— कथम्, कथं मां धर्मदूषणमात्थ ? अरे । कः खल्वधर्मो मया सेवितः ?

**भीमसेनः**— नरभक्षणम् ।

**बकः**— नरभक्षणं नाम मांसाशिनां राक्षसानां धर्मः ।

**भीमसेनः**— नररक्षणं नाम भूमिपालानां क्षत्रियाणां धर्मः ।

**बकः**— क्षत्रियोऽसि ?

**भीमसेनः**— बाढम्, क्षत्रियोऽस्मि ।

**रक्षिता साधुलोकानां वरिष्ठो बाहुशालिनाम् ।**
**निषूदको हिडिम्बस्य मृत्युश्चास्मि भवादृशाम् ॥ ४ ॥**

**बकः**— अहह ! मम मित्रस्य हिडिम्बस्य हन्ता कौन्तेयो भवान् ?

**भीमसेनः**— कामम् ! कौन्तेयोऽस्मि भीमसेनः ।

**बकः**— इदमस्ति मे भागधेयम् । चिरान्विष्टो मृगः स्वयमुत्पतितो व्याघ्रगह्वरम् । श्लाघनीयोऽसि मे रिपुः ।

**भीमसेनः**— इदं मे स्वस्त्ययनं यन्मां श्लाघनीयं रिपुं मन्यसे । अनुवर्तस्व ते मित्रं हिडिम्बम्, वाचाट! क्षत्रियडिम्भ, गृहाण शस्त्रम् शातयामि ते दर्पम् ।

भीमस्य शत्रुगणमर्दनगर्धनस्य
सिंहस्य मत्तगजपाटनलम्पटस्य ।
किं मूढ शस्त्रकथया ननु वज्रकल्पः
त्वन्मस्तकास्थिभिदुरोऽस्ति ममैष मुष्टिः ॥ ५ ॥

(उभौ प्रहरतः । मल्लयुद्धं प्रवर्तते । हतः पतति बकः ।)

**भीमसेनः—** (प्रविश्य) पशुमारं मारितो बकासुरः ।

(नेपथ्ये)

हते हिडिम्बरिपुणा बलीयसि बकासुरे ।
दुर्योधनस्य धूर्तस्य प्रथमं भयमागतम् ॥ ६ ॥

**भीमसेनः—** सत्यमाह दैवी वाक् ।

भगवति जगदम्ब त्वत्प्रसादाद् दुरात्मा
हत इह बकदैत्यो सन्ति चान्ये बकाभाः ।
वितर बलमथैवं हन्तुमस्माकमेतान्
जयतु भुवि नरेन्द्रो धर्मराजश्चिराय ॥ ७ ॥

(नेपथ्ये)

विजयतां धर्मराजो युधिष्ठिरः ।

॥ इति चतुर्थोऽङ्कः ॥

इति विदुषा नडहल्ली रङ्गनाथशर्मणा प्रणीतं
एकचक्रं नाम रूपकं समाप्तम् ।

# श्रीशङ्करचरितामृतम्

सर्ववेदान्तवेद्याय प्रकाशैकस्वरूपिणे ।
धृतश्रीभगवत्पादाकृतये ब्रह्मणे नमः ॥ १ ॥

अस्ति केरलदेशश्रीः पूर्णा नाम तरङ्गिणी ।
पूर्णा पुण्यजलै रम्या परितः श्यामलैर्वनैः ॥ २ ॥

अनुपूर्णं शुभो ग्रामः कालटिर्धाम गीष्पतेः ।
वेदशास्त्रविदामासीत् भूसुराणां निवासभूः ॥ ३ ॥

सौम्यः शिवगुरुस्तेषु द्विजराजो व्यराजत ।
सुतो विद्याधिराजस्य नक्षत्रेष्विव चन्द्रमाः ॥ ४ ॥

अरुन्धतीव कल्याणी वसिष्ठस्य महात्मनः ।
आर्याम्बा तस्य पत्न्यासीत् पतिमेवानुरुन्धती ॥ ५ ॥

इष्टानवाप्तेः पुण्यानां कर्मणां चरणादपि ।
शिवमुद्दिश्य पुत्रार्थं तीव्रं तौ तप आस्थितौ ॥ ६ ॥

याते बहुतिथे काले प्रसन्नः परमेश्वरः ।
स्वप्ने जगाद कामो वां सेत्स्यतीति स्फुटं वचः ॥ ७ ॥

एवमाश्वासितार्याम्बा ध्यायन्ती मनसा शिवम् ।
सुलग्ने सुषुवे पुत्रं त्रिविक्रममिवादितिः ॥ ८ ॥

अनसूया महाभागा दत्तात्रेयमिव प्रभुम् ।
तेजसा वर्चसा दीप्तं सर्वलक्षणसंयुतम् ॥ ९ ॥

शङ्करानुग्रहाज्जातं शङ्करांशसमुद्भवम् ।
पिता शङ्करनाम्ना तं योजयामास शास्त्रवित् ॥ १० ॥

मुग्धस्मितमुखं दृष्ट्वा सुतं मधुरचेष्टितम् ।
पितरौ नाप्नुतां तृप्तिं मधु पीत्वेव षट्पदौ ॥ ११ ॥

अथ वर्षत्रयादर्वाक् संसारस्य प्रदर्शयन् ।
निःसारतां शिवगुरुर्दैवात्स्वर्गमुपेयिवान् ॥ १२ ॥

आर्याम्बा शोकसन्तप्ता तनयं कुलदीपकम् ।
प्रीत्या संवर्धयामास विद्येव विनयोद्गमम् ॥ १३ ॥

अधीताक्षरविन्यासो गैर्वाण्यां भाषितुं क्षमः ।
बभूव शङ्करो बाल्ये जनन्यैव सुशिक्षितः ॥ १४ ॥

कृतोपनयनो वर्षे पञ्चमे शङ्करो वटुः ।
उपसद्य गुरुं वेदं काव्यञ्चाध्यैत बुद्धिमान् ॥ १५ ॥

अधीत्य वेदांश्चाङ्गानि कुशलोऽधीतिकर्मणि ।
वर्षेऽष्टमे चतुर्वेदो बभूवाद्भुतमेधया ॥ १६ ॥

लोकातिशायिधीशक्तेः सकृद्दृष्टं सकृत् श्रुतम् ।
वज्रलेपायितं बुद्धौ शङ्करस्य महात्मनः ॥ १७ ॥

वैशेषिकादिशास्त्राणि बौद्धजैनागमानपि ।
अध्यगीष्ट सकृत् श्रुत्वा बालो विस्मापयन् गुरून् ॥ १८ ॥

भिक्षार्थी स ययौ जातु गृहं विप्रस्य कस्यचित् ।
दारिद्र्योपहते तस्मिन् देयमासीन्न किञ्चन ॥ १९ ॥

तेजस्विनं वटुं दृष्ट्वा गृहिणी दीनमानसा ।
फलमामलकं तस्मै ददौ बाष्पमुखी शुचा ॥ २० ॥

तद्दारिद्र्यं तदौदार्यं दृष्ट्वास्य करुणात्मनः ।
शङ्करस्याद्रवच्चित्तं नवनीतमिवोष्मणा ॥ २१ ॥

आशुसङ्ग्रथितैः श्लोकैर्भक्तिपूर्णैर्मनोरमैः ।
अनुग्रहार्थमस्तौषीत् स लक्ष्मीमर्थदेवताम् ॥ २२ ॥

क्षणेन सझणत्कारैः कनकामलकैर्गृहम् ।
कीर्णं शुभैः श्रियो मूर्तैः कटाक्षैरिव सर्वतः ॥ २३ ॥

अद्यापि केरलग्रामे 'पोन्नर् तोडत' नामनि ।
श्रीमतामस्ति तद्गेहं 'स्वर्णत्तिल्लम्' इति श्रुतम् ॥ २४ ॥

अनुज्ञया गुरोस्तस्य निवृत्तस्य गृहं प्रति ।
सर्वतः प्रसृता कीर्तिर्विद्यावर्धिततेजसः॥ २५ ॥

अनुष्ठानमधीतिश्च शुश्रूषा मातुरन्वहम् ।
त्रितयेन वटोरासीदमितं ब्रह्मवर्चसम् ॥ २६ ॥

मातुः सुखार्थं वृद्धाया नित्यस्नानविधौ नदी ।
शङ्करेणार्थिता पूर्णा स्वपथं परिमुञ्चती ॥ २७ ॥

ईषद्वक्रपथेनासावार्याम्बागृहसन्निधौ ।
प्रावहद्दर्शयन्ती तन्महात्म्यं ब्रह्मचारिणः ॥ २८ ॥

प्रसृता चन्द्रिकेवाभूत् कीर्तिस्तस्य मनोहरा ।
तमद्भुतवटुं द्रष्टुं केरलेशः समाययौ ॥ २९ ॥

विद्याविनयसम्पन्नं वाग्मिनं ब्रह्मचारिणम् ।
तेजस्विनं च तं दृष्ट्वा विस्मितो राजशेखरः ॥ ३० ॥

दिव्यज्योतिरिदं राज्ये मदीये समभूदिति ।
धन्यं मन्यमनास्तस्मै सोऽदित्सद् विपुलं वसु ॥ ३१ ॥

विरक्तः शङ्करः किञ्चिन्नाददे किन्तु तद्धनम् ।
दीनेभ्यो दापयामास प्रभुणैव दयार्द्रधीः ॥ ३२ ॥

सन्तुष्टस्तं वटुं भूपो नत्वा तस्य च मातरम् ।
प्रतस्थे गजमारूढो विस्मयाविष्टमानसः ॥ ३३ ॥

सर्वशास्त्रेषु विदुषः शङ्करस्य मनीषिणः ।
नित्यानित्यविवेकोत्थं वैराग्यं ववृधेतराम् ॥ ३४ ॥

समुद्भूता ततस्तीव्रा संन्यासग्रहणे मतिः ।
सम्यक् पल्लविते चूते पुष्पादिव फलोद्गतिः ॥ ३५ ॥

एकपुत्रा तु माता तत्संन्यासं नान्वमोदत ।
किं कर्तव्यमिति प्राज्ञश्चिन्तयन् शङ्करः स्थितः ॥ ३६ ॥

स्नानार्थमवगाढस्य पूर्णां तस्य कदाचन ।
जग्राह चरणं नक्रो हाहाकारो महानभूत् ॥ ३७ ॥

विक्रोशन्तीं तटे स्थित्वा मातरं कुररीमिव ।
अब्रवीच्छङ्करो धीरो मा रोदीरम्ब मां प्रति ॥ ३८ ॥

अनुमन्यस्व संन्यासं जातस्य मरणं ध्रुवम् ।
पुत्रकस्यान्तिमां याच्ञां मत्वा साऽनुमतिं ददौ ॥ ३९ ॥

मया संन्यस्तमित्येवं सङ्कल्पमकरोद्वटुः ।
दैवान्नक्रेण मुक्तोऽयं शङ्करस्तीरमाययौ ॥ ४० ॥

पुत्रसंन्यासदुःखार्ता तदुज्जीवनहर्षिता ।
हिमार्द्रा नलिनीवाम्बा भास्करोच्छ्वासिता बभौ ॥ ४१ ॥

आर्याम्बा गेहमायासीत् सपुत्रा खिन्नमानसा ।
बाष्पवेगं निरुन्धाना हर्षशोकसमुद्भवम् ॥ ४२ ॥

आह स्म शङ्करो 'मातः किमर्थमनुशोचसि ।
पत्नी त्वमृषिकल्पस्य प्राज्ञस्य विदुषः सती ॥ ४३ ॥

साम्प्रतं चासि यतिना पुत्रिणी धैर्यमावह ।
त्वत्पार्श्वमागमिष्यामि स्मृते मयि न संशयः ॥ ४४ ॥

कुर्वन्ति तव शुश्रूषां दायादाः प्रातिवेशिकाः ।
यस्मात् पित्र्यं धनं भूरि ग्रहीष्यन्ति ततः परम्' ॥ ४५ ॥

आर्याम्बा त्वब्रवीद् वत्स प्रयातायामितो मयि ।
कर्तासि मम संस्कारमित्याशा हृदये धृता ॥ ४६ ॥

एवं भविष्यतीत्युक्त्वा समाश्वास्य स मातरम् ।
निवेद्य सर्वं बन्धुभ्यो दयां मातर्ययाचत ॥ ४७ ॥

ततः प्रणम्य जननीं गृहात्प्रस्थितमञ्जसा ।
काषायवाससं दृष्ट्वा व्यस्मयन्त समे जनाः ॥ ४८ ॥

अथ श्रीशङ्करो दण्डी प्रतस्थे मार्गयन् गुरुम् ।
अमृतस्याप्तये पद्मं प्रफुल्लमिव षट्पदः ॥ ४९ ॥

रेवातटमुपासीनं श्रीगोविन्दयतीश्वरम् ।
समेत्य प्रणनामासौ सद्गुरुं ज्ञानिनां वरम् ॥ ५० ॥

तत्प्रसादेन शास्त्रीयं संन्यासं विधिपूर्वकम् ।
गृहीत्वा शङ्करो विज्ञस्तच्छिष्यत्वमुपेयिवान् ॥ ५१ ॥

अध्यैत सर्ववेदान्तान् सम्प्रदायविदो गुरोः ।
शिष्यात् श्रीगौडपादस्य श्रीगोविन्दयतीश्वरात् ॥ ५२ ॥

लोकातिशायिनीं मेधां वाग्विलासं नवं वयः ।
गुरुराड् वीक्ष्य शिष्यस्य मुमुदे मुमुदे हृदि ॥ ५३ ॥

वर्षासु नर्मदापूरस्तटमुत्क्रम्य दुर्दमः ।
प्रावहज्जनयन् भीतिं भृशमाश्रमवासिनाम् ॥ ५४ ॥

गोविन्दभगवत्पादे समाधिं दृढमास्थिते ।
श्रीशङ्करोऽभिमन्त्र्य स्वं करकं निदधौ पुरः ॥ ५५ ॥

स पपौ सकलं पूरं कुम्भयोनिरिवाम्बुधिम् ।
निरापद्याश्रमे सर्वे तुष्टास्तं तुष्टुवुर्यतिम् ॥ ५६ ॥

श्रीगोविन्दयतीन्द्रस्तु समाधेरुत्थितस्ततः ।
ज्ञात्वेदं योगसंसिद्धं मेने श्रीशङ्करं यतिम् ॥ ५७ ॥

किमेष शङ्करः साक्षादवतीर्णः कलौ युगे ।
वैदिकं धर्ममुद्धर्तुमित्यसौ संशयं दधे ॥ ५८ ॥

एकदा गुरुराह स्म श्रीशङ्करयतिं रहः ।
वत्स त्वयार्जिता विद्या नास्ति ज्ञेयमितः परम् ॥ ५९ ॥

क्षेत्रं वाराणसीं गत्वा गङ्गातटमुपाश्रयन् ।
व्याप्रियस्व शिवं ध्यायन् लोकसङ्ग्रहकर्मणि ॥ ६० ॥

पश्य भारतदेशेऽस्मिन् प्राप्तां धर्मस्य दुर्दशाम् ।
अवैदिकमतान्येव प्रचुराणि समन्ततः ॥ ६१ ॥

ब्रह्मौपनिषदं सत्यमद्वैतं शान्तमव्ययम् ।
उपेक्ष्य पण्डिताः शुष्कतर्केष्वेव प्रतिष्ठिताः ॥ ६२ ॥

अद्वितीयं परं तत्त्वं भगवान् बादरायणः ।
श्रुतिभिर्युक्तिभिश्चापि प्रत्यपादयदच्युतम् ॥ ६३ ॥

तच्छारीरकसूत्रेषु वेदान्तानां समन्वयः ।
वेदान्तदर्शनं ह्येतत्तदन्यद् द्वैतदर्शनम् ॥ ६४ ॥

सम्प्रदायानभिज्ञास्तु सूत्रार्थानन्यथान्यथा ।
यथारुचि नयन्त्येते मिथ्यापाण्डित्यगर्विताः ॥ ६५ ॥

शारीरकीयसूत्राणां बादरायणसंमतम् ।
विस्तरेण त्वया भाष्यं प्रणेयमिति मे मतिः ॥ ६६ ॥

गीतोपनिषदां चापि माण्डूक्यानां विशेषतः ।
भाष्याणि रचनीयानि यत्राद्वैतं प्रतिष्ठितम् ॥ ६७ ॥

प्रस्थानत्रयमेतद्धि भक्त्युपासनकर्मणाम् ।
याथातथ्येन यत्रास्ते ब्रह्मज्ञानोपयोगिता ॥ ६८ ॥

तरुणोऽसि समर्थोऽसि बुद्धिमानसि शङ्कर ।
भाष्याणि विरचय्यैवं तत्त्वसंरक्षको भव ॥ ६९ ॥

मङ्गलं वितरत्वीशो मङ्गलं ते गुरुर्मम ।
अहं मङ्गलमाशासे तव स्तात् सर्वमङ्गलम् ॥ ७० ॥

इत्युदीरितमाकर्ण्य श्रीगोविन्दयतीश्वरैः ।
गुरुकारुण्यसंहृष्टो बाष्पपूर्णेक्षणोऽभवत् ॥ ७१ ॥

शिरस्यञ्जलिमाधाय भक्त्या श्रीशङ्करो यतिः ।
प्रदक्षिणत्रयं कृत्वा पादयोर्न्यपतद् गुरोः ॥ ७२ ॥

आशीर्भिः सह गुर्वाज्ञां लब्ध्वा गुरुमनुस्मरन् ।
काशीक्षेत्रमना धैर्यात् निर्जगाम तदाश्रमात् ॥ ७३ ॥

वाराणसीमसौ गत्वा विद्वद्भिः सह सङ्गतः ।
अचिरादभितस्तस्य प्रासरत् कीर्तिकौमुदी ॥ ७४ ॥

तया च हर्षितः कश्चिद्द्विजश्चोलसमुद्भवः ।
चकोर इव सम्प्राप्तः श्रोत्रियो मार्गयन् गुरुम् ॥ ७५ ॥

सनन्दनाभिधो विद्वान् नत्वा श्रीशङ्करं गुरुम् ।
संन्यासे दीक्षितः पश्चात् पद्मपादाभिधां दधौ ॥ ७६ ॥

अन्ये च बहवः शिष्याः वेदान्तमधुलोलुपाः ।
श्रीशङ्करपदाम्भोजं मधुपा इव शिश्रियुः ॥ ७७ ॥

माध्याह्निकमनुष्ठातुं कदाचिज्जाह्नवीं नदीम् ।
शिष्यैः सह यतीन्द्रोऽसौ प्रतस्थे ब्रह्मविद्वरः ॥ ७८ ॥

मार्गे चण्डालरूपेण श्वभिः शर्वमुपस्थितम् ।
दृष्ट्वा श्रीशङ्करेणोक्तं दूरतो गम्यतामिति ॥ ७९ ॥

पप्रच्छ स तदा स्मित्वा ब्रह्मन् केनाद्य गम्यताम् ।
ब्रह्मणा निष्क्रियेणाहो देहेनाथ जडेन वा ॥ ८० ॥

इत्येवं वाक्छले वृत्ते चण्डालं ज्ञानिनां वरम् ।
ज्ञात्वा तत्रैव यतिराण् मनीषापञ्चकं जगौ ॥ ८१ ॥

दर्शयित्वा प्रसन्नः स्वं दिव्यरूपं महेश्वरः ।
अन्तर्दधे यतीशस्तु चकितो जाह्नवीं ययौ ॥ ८२ ॥

सशिष्यो बदरीं गत्वा मुनिभिर्योगिभिस्सह ।
आचार्यो विमृशन् शास्त्रं ब्रह्मध्यानपरोऽभवत् ॥ ८३ ॥

अथ श्रीशङ्कराचार्यो गुरुं ध्यात्वा समाहितः ।
बादरायणसूत्राणि व्याचख्यौ ललितैः पदैः ॥ ७४ ॥

अर्थानुसारिभिः शब्दैरर्थैः शब्दानुसारिभिः ।
सुवर्णसूत्रसन्दब्धं मुक्ताहारमिवोज्ज्वलम् ॥ ८५ ॥

व्यूढदृष्टान्तयुक्त्याढ्यं गूढसूत्रार्थदीपकम् ।
प्रौढकाव्यवचोरम्यं गाढाज्ञानतमोनुदम् ॥ ८६ ॥

क्वचित् क्षुब्धाब्धिसङ्काशं क्वचिद्भास्वत्समुज्ज्वलम् ।
द्वैतविध्वंसनोद्दण्डं साङ्ख्यादिमतखण्डनम् ॥ ८७ ॥

मण्डनं छन्दसां भूयो विद्वज्जनतपःफलम् ।
गङ्गावारिसमं शुद्धं शान्तं चित्तमृषेरिव ॥ ८८ ॥

वाचस्पतिशिरोधार्यं सरस्वत्या निकेतनम् ।
भाषाशैल्या उदाहार्यं ग्राह्यं सर्वमुमुक्षुभिः ॥ ८९ ॥

ब्रह्मविद्भिः परं ध्येयं पेयं शास्त्रार्थकोविदैः ।
सम्प्रदायक्रमारूढं सर्वशिष्टपुरस्कृतम् ॥ ९० ॥

अद्वयं परमं सत्यं ब्रह्म यत्र प्रकाशितम् ।
तद्बभाषे गुरुर्भाष्यं शङ्करो लोकशङ्करः ॥ ९१ ॥

ततः श्रीभगवत्पादो गीतोपनिषदामपि ।
गम्भीरार्थानि भाष्याणि निर्ममे निर्ममेश्वरः ॥ ९२ ॥

प्रस्थानत्रयभाष्याणि प्रेक्ष्य ते मुनिसत्तमाः ।
सन्तुष्टिं परमां प्राप्ताः शशंसुस्तरुणं यतिम् ॥ ९३ ॥

अहो भाष्यमहो भाष्यमहो भाग्यमहो श्रुतिः ।
इत्थं तत्र महानासीत् सम्भ्रमो मुनिसंसदि ॥ ९४ ॥

तत्प्रशंसागृहीतात्मप्रत्ययो यतिराट् पुनः ।
वाराणसीं प्रपेदेऽसौ सशिष्यस्तृप्तमानसः ॥ ९५ ॥

दिगन्तव्याप्तसत्कीर्तिं श्रीशङ्करयतीश्वरम् ।
शुश्रूषितुं पुनः शिष्या नानादेशेभ्य आययुः ॥ ९६ ॥

तन्मानसप्ररूढं श्रीशङ्करार्यपदाम्बुजम् ।
हंसा इव परं प्रीता यथाकामं सिषेविरे ॥ ९७ ॥

पुण्ये भागीरथीतीरे भाष्याणि प्रत्यहं गुरुः ।
शिष्यानध्यापयन्नासीत् वेदव्यास इवापरः ॥ ९८ ॥

तमांसि ध्वंसयंस्तेषु द्योतयन् दर्शने गतिम् ।
तेजांसि भास्करो लोकेष्विव सङ्क्रामयन् बभौ ॥ ९९ ॥

प्रवृत्ते सूत्रभाष्यस्य पाठने बादरायणः ।
वृद्धविप्र इवागत्य श्रवणेच्छुरुपाविशत् ॥ १०० ॥

सङ्गत्यादिकथापूर्वं सूत्रव्याख्यानकौशलम् ।
हृदयेनाभ्यनुज्ञातं श्रुत्वासौ मुमुदेतराम् ॥ १०१ ॥

तेन चोत्थापिताः शङ्काः श्रुतिसूत्रार्थयोजने ।
सर्वा अपि यतीशेन स्पुटवाण्या समाहिताः ॥ १०२ ॥

उदतिष्ठन्महातेजा विप्रः पिङ्गजटाधरः ।
आत्मानं दर्शयन् दण्डी धरन् कृष्णमृगत्वचम् ॥ १०३ ॥

ससंभ्रमं समुत्थाय सशिष्यः शङ्करो यतिः ।
बद्धाञ्जलिपुटस्तस्थौ नेत्राभ्यां तं पिबन्निव ॥ १०४ ॥

अथ विस्मापयन् वेदव्यासः प्रोवाच शङ्करम् ।
ज्योत्स्नामिव किरन् दन्तकान्तिभिः सस्मितं वचः ॥ १०५ ॥

वत्स त्वमभिजानीषे मदीयं गूढमाशयम् ।
शारीरकेषु सूत्रेषु प्रहृष्टं हृदयं मम ॥ १०६ ॥

सर्ववेदान्तसिद्धान्तो निहितोऽत्र मया मुने ।
इमं प्रसार्य लोकेऽस्मिन् सत्यसंरक्षको भव ॥ १०७ ॥

इत्युक्त्वान्तर्हिते तस्मिन् मुनौ श्रीशङ्करस्तदा ।
गुर्वाज्ञां स्मारितो योगी कृत्यशेषमचिन्तयत् ॥ १०८ ॥

विद्वत्तल्लजसाहाय्यं भाष्यप्राचुर्यसिद्धये ।
अपेक्ष्यमिति मन्वानः सस्मार स कुमारिलम् ॥ १०९ ॥

भट्टपाद इति ख्यातं मीमांसकधुरन्धरम् ।
तं द्रष्टुमुत्सुकः प्रायात् प्रयागं शङ्करो यतिः ॥ ११० ॥

कुमारिलस्तु धर्मात्मा वर्षीयान् कर्मठो बुधः ।
मतं बौद्धगुरोश्छित्वा गुरुद्रोहममन्यत ॥ १११ ॥

तुषानलप्रविष्टं तं तन्निष्कृतिविधित्सया ।
ददर्श शङ्कराचार्यः साक्षाद्धर्ममिवापरम् ॥ ११२ ॥

आचार्यस्याशयं सर्वं श्रुत्वोवाच कुमारिलः ।
भगवन्नास्ति मे भाग्यं त्वत्सेवाधन्यताभवम् ॥ ११३ ॥

अस्ति मे शिष्यमूर्धन्यो विश्वरूपो बहुश्रुतः ।
माहिष्मतीपुरे वेदमण्डनः पण्डितोत्तमः ॥ ११४ ॥

स मीमांसकमूर्धन्यो, जितश्चेत् सर्वमीप्सितम् ।
तव सेत्स्यति कार्याणां सिद्धिस्तेन भविष्यति ॥ ११५ ॥

इत्युक्त्वोपरतं शान्तमभिनन्द्य यतीश्वरः ।
शीघ्रं माहिष्मतीं प्रागात् सशिष्यः कुतुकी भृशम् ॥ ११६ ॥

आसाद्य तत्पुरीं रम्यां विश्वरूपं ददर्श सः ।
उपासितं विपश्चिद्भिः शिष्यैश्च ब्रह्मचारिभिः ॥ ११७ ॥

ससम्भ्रममथोत्थाय प्रणतं तं द्विजोत्तमम् ।
जगाद स्वागमोद्देशं स्मयमानो यतीश्वरः ॥ ११८ ॥

वादं शास्त्रेषु सूरीन्द्रो हर्षेणैवान्वमोदत ।
नोत्सहेत समाहूतो योद्धुं को रणपण्डितः ॥ ११९ ॥

परेद्युरभवद्वादो विश्वरूपयतीशयोः ।
कर्मैव मोक्षहेतुः स्यात् ज्ञानमेवेति वादिनोः ॥ १२० ॥

विश्वरूपस्य भार्याभून्मध्यस्था बुधसंसदि ।
भारती भारती साक्षात् सर्वशास्त्रेषु पारगा ॥ १२१ ॥

वादयुद्धं समारब्धं परस्परजिगीषया ।
नखदंष्ट्रासमानाभिर्युक्तिभिः सूरिसिंहयोः ॥ १२२ ॥

अपूर्वामश्रुतां दृष्ट्वा तयोः पाण्डित्यवैखरीम् ।
व्यस्मयन्त सरोमाञ्चाः समवेता विपश्चितः ॥ १२३ ॥

वादः प्रववृते कांश्चिद्दिवसान् सततं तयोः ।
अक्षय्यैर्युक्तिसङ्घातैरक्षुण्णैर्विशिखैरिव ॥ १२४ ॥

व्यवर्धत यतीशस्य प्रभा बालरवेरिव ।
अक्षीयत प्रवृद्धस्य मण्डनस्य रवेरिव ॥ १२५ ॥

आद्येऽभियोगसामर्थ्यं द्वितीये रक्षणात्मकम् ।
मण्डनस्य तृतीयेऽह्नि सर्वं खर्वमजायत ॥ १२६ ॥

जितोऽस्मीत्यब्रवीदन्ते निस्तेजा मण्डनः सुधीः ।
ओमिति प्रतिदध्वान ध्वानोऽसौ भारतीरितः ॥ १२७ ॥

पत्युः पराजयात् खिन्ना विदुष्युभयभारती ।
अर्धाङ्गीत्याह्वयद्धीरा वादार्थं यतिनाम् वरम् ॥ १२८ ॥

ततः प्रववृते वादो विस्तृतो विस्मयावहः ।
अन्ते पराजिता देवी प्रणनाम जगद्गुरुम् ॥ १२९ ॥

बद्धाञ्जलिपुटस्तस्थौ विश्वरूपोऽथ नम्रया ।
गिरा विज्ञापयामास श्रीशङ्करयतीश्वरम् ॥ १३० ॥

गुरो यतीन्द्र सर्वज्ञ प्रक्षीणं मामकं तमः ।
अद्वये रमते चित्तं ब्रह्मणि ध्वस्तकर्मणि ॥ १३१ ॥

विरक्तोऽस्मि समस्तेषु क्षेत्रदारगृहादिषु ।
शरणं त्वां प्रपन्नोऽस्मि शिष्यं मां स्वीकुरु प्रभो ॥ १३२ ॥

न व्यरुन्ध पतिं साध्वी संन्यासे कृतनिश्चयम् ।
प्रातिकूल्येऽपि न घ्नन्ति पत्युरिच्छां कुलस्त्रियः ॥ १३३ ॥

विधिवत्सोऽथ संन्यस्तो मेघमुक्त इवार्यमा ।
सुरेश्वराभिधां प्राप्तो विरेजे पूर्वतोऽधिकम् ॥ १३४ ॥

अथ शिष्यैः सह प्राप्तः श्रीशैलं शङ्करो गुरुः ।
स्नात्वा पातालगङ्गायामस्तावीन्मल्लिकार्जुनम् ॥ १३५ ॥

स्तुवतः शिवमानन्दात् भक्त्याविष्टगुरोर्मुखात् ।
आनन्दलहरीरूपा निःससार सरस्वती ॥ १३६ ॥

उवास तीरे कृष्णायाः रम्ये तरुलतासुमैः ।
कुर्वन्नाह्निकमाचार्यश्चित्तहारिणि वारिणि ॥ १३७ ॥

पश्यन् काननसौभाग्यं ध्यायन् सर्वेश्वरं शिवम् ।
अध्यापयंश्च तान् शिष्यान् कञ्चित्कालं निनाय सः ॥ १३८ ॥

वादार्थमुद्धतास्तत्र प्राप्ताः कापालिकादयः ।
क्रूराः पराजिताः सर्वे गुरुणा गुरुयुक्तिभिः ॥ १३९ ॥

वादे जितस्तु दुर्मेधाः कश्चित् कापालिकाधमः ।
मनसाऽचिन्तयद्घोरं कर्म कर्तुं यतीशितुः ॥ १४० ॥

अन्येद्युश्छन्नवेषोऽसावागतो विनयोक्तिभिः ।
होतुं भैरवसम्प्रीत्यै ययाचे श्रीगुरोः शिरः ॥ १४१ ॥

अङ्गीचकार भगवान् वैराग्यस्य महानिधिः ।
देहेऽभिमानः कस्तस्य यस्येदं कत्तृणं जगत् ॥ १४२ ॥

आत्मारामस्य विदुषः शरीरे का भवेत् स्पृहा ।
पयःपानेन तृप्तस्य का वाञ्छा लवणाम्भसि ॥ १४३ ॥

श्वः प्रभातेऽहमेकाकी तिष्ठाम्यत्रैव भैरव ।
मम शिष्यैरदृष्टस्त्वं निःशङ्कं मे शिरो हर ॥ १४४ ॥

इत्युक्तो योगिवर्येण भैरवो भैरवस्वनम् ।
हसन्निष्टस्य संसिद्धिं मन्वानो दुर्मतिर्ययौ ॥ १४५ ॥

परेद्युः सर्वशिष्येषु प्रयातेषु नदीम्प्रति ।
निर्वातदीपवद्योगी समाधावचलः स्थितः ॥ १४६ ॥

न्यस्यन्नितस्ततो दृष्टिं निःशब्दं खड्गमुद्धरन् ।
ससर्प सर्पवद् घोरः खलः कापालिको गुरुम् ॥ १४७ ॥

पद्मपादः समागच्छन् दैवात्तं प्रेक्ष्य सत्वरम् ।
नारसिंहेण मन्त्रेण स्तम्भयामास भैरवम् ॥ १४८ ॥

हाहाकारस्त्वभूदुच्चैः शिष्याश्च त्वरयाययुः ।
धिक्कृतो भैरवः सर्वैर्लज्जितो निर्गतो द्रुतम् ॥ १४९ ॥

श्रीमच्छङ्करयोगीन्द्रो समाधेर्विरतः शनैः ।
नरसिंहस्तुतिं चक्रे क्षान्तः शान्तश्च निर्ममः ॥ २५० ॥

श्रीशैलात् प्रस्थितो योगी शिष्यैः परिवृतः समैः ।
ग्रामीणान् बोधयन् धर्मं गोकर्णाभिमुखो ययौ ॥ १५१ ॥

स्थापयन् वैदिकं धर्मं ख्यापयन् शास्त्रपद्धतिम् ।
हापयन् दुर्मतश्रद्धां गापयन् देवतास्तुतिम् ॥ १५२ ॥

ततो मूकाम्बिकाक्षेत्रं वन्येनैव पथा ययौ ।
वर्णयन्नैश्वरीं लीलां वीक्ष्यारण्यस्य वैभवम् ॥ १५४ ॥

मार्गे ददर्श योगीन्द्रो दम्पती पुरतः शिशुम् ।
मृतं निधाय करुणं रुदन्तौ बन्धुभिर्वृतौ ॥ १५५ ॥

कोमलं हृदयं तस्य द्रुतं तौ पश्यतो मुनेः ।
सदयं तेन संस्पृष्टो बालः सञ्जीवितोऽभवत् ॥ १५६ ॥

तस्मिन्नुज्जीविते सर्वैर्हर्षोद्रेकेण पूजितः ।
तेषां हर्षेण संहृष्टः स प्राप क्षेत्रमूर्जितम् ॥ १५७ ॥

भेरीमृदङ्गनिर्ह्लादैर्मेघगर्जितडम्बरैः ।
प्रतिध्वनितमम्बाया विवेश मुनिरालयम् ॥ १५८ ॥

अस्तौषीदर्थगम्भीरैरम्बिकां बन्धुरैः पदैः ।
चित्तस्य रञ्जिनीं शम्भोर्मूकदानवभञ्जिनीम् ॥ १५९ ॥

तत्रत्यैरर्चितः सद्भिर्देव्या माहात्म्यमुद्गिरन् ।
शम्भोरर्धशरीरस्य तत्त्वं प्राकाशयत् प्रभुः ॥ १६० ॥

शिवक्षेत्रमथ प्रायाद् गुरुः श्रीबलिनामकम् ।
भव्यशिल्पकलारम्यं प्रविवेश शिवालयम् ॥ १६१ ॥

तुष्टावाशुकृतश्लोकैर्भक्तिसारैर्मनोरमैः ।
अभिषिञ्चन्निवेशानं गङ्गाजलसमैः शुभैः ॥ १६२ ॥

तत्रागत्य बुधः कश्चित् सपुत्रः शङ्करं गुरुम् ।
प्रणम्योवाच भगवन् बालोऽयं कृपयेक्ष्यताम् ॥ १६३ ॥

उपनीत्यन्तसंस्काराः क्रमेणास्य मया कृताः ।
एकान्तप्रियतामस्य ज्ञातुं न प्रभवाम्यहम् ॥ १६४ ॥

क्षुत्पिपासे न जानीते दत्तं किञ्चिन्निषेवते ।
शास्त्रमिच्छति नाध्येतुं द्वित्रैः शब्दैस्तु भाषते ॥ १६५ ॥

अन्धवज्जडवच्चैव मूकवच्चास्य वर्तनम् ।
इत्येवमुक्तो गुरुराट् बालकं तमवैक्षत ॥ १६६ ॥

कस्त्वं भो जडता कैषेत्यन्वयुङ्क्त यतीश्वरः ।
बालकस्त्वञ्जलिं बध्वा तमुवाच निरर्गलम् ॥ १६७ ॥

अहमस्मि परं ब्रह्म क्षुत्पिपासे न मे क्वचित् ।
चैतन्यैकस्वरूपस्य जडता न कदाचन ॥ १६८ ॥

अन्धता मूकता वापि निर्विशेषे कथं भवेत् ।
स्वप्नतुल्ये जगत्यस्मिन् व्यवहारेण किं फलम् ॥ १६९ ॥

इत्युक्त्वा दण्डवद् भूमौ प्रणनाम गुरोः पुरः ।
पिता चान्ये च तत् श्रुत्वा निमग्ना विस्मयाम्बुधौ ॥ १७० ॥
शङ्करः सस्मितस्तस्य पितरं प्रत्यभाषत ।
वेत्त्ययं परमं तत्त्वं हस्तस्थामलकं यथा ॥ १७१ ॥

प्रारब्धकर्मशेषेण प्राप्तो मानुष्यकं पुनः ।
अनेन नोपयोगस्ते विद्वन्नस्ति कुटुम्बके ॥ १७२ ॥

अनुगच्छतु मामेषः यदि त्वमनुमन्यसे ।
ज्ञानिनानेन पुत्रेण कृतार्थं त्वत्कुलं द्विज ॥ १७३ ॥

एवमुक्तः स पुत्रस्य मुखं प्रैक्षत चिन्तया ।
गच्छामीतीङ्गितं दत्त्वा स बालः प्राणमद्गुरुम् ॥ १७४ ॥

हस्तामलकनाम्नासौ गुरुणा करुणात्मना ।
सम्प्राप्तानुग्रहो नीतः पिता त्वश्रुमुखोऽभवत् ॥ १७५ ॥

सुरेश्वरादिभिः शिष्यैर्ययौ श्रीशङ्करो गुरुः ।
शृङ्गेरीं तत्र तेन श्रीशारदा सुप्रतिष्ठिता ॥ १७६ ॥

देशिकेन्द्रस्य शिष्योऽभूद् गिरिर्नाम गुणाधिकः ।
एकभक्तिः सिषेवे तं सद्गुरुं सततोत्थितः ॥ १७७ ॥

क्षालयिष्यन् गुरोर्वस्त्रं प्रायात्तुङ्गातरङ्गिणीम् ।
पाठकाले च सम्प्राप्ते किञ्चिदेष व्यलम्बत ॥ १७८ ॥

आरिप्सिते शान्तिपाठे गुरुः श्रीशङ्करोऽब्रवीत् ।
आगच्छतु गिरिः सोऽपि नद्या इति कृपानिधिः ॥ १७९ ॥

पद्मपादस्तदा स्मित्वा तिर्यक् कुड्यमलोकत ।
मन्दबुद्धिर्गिरिस्तस्य व्यर्थमध्ययनन्त्विति ॥ १८० ॥

तस्येङ्गितं गुरुर्ज्ञात्वा शमयंस्तदहङ्कृतिम् ।
अनुजग्राह विद्याभिर्गिरिं योगबलात् प्रभुः ॥ १८१ ॥

योगसङ्क्रान्तविज्ञानः स गिरिस्तेजसा ज्वलन् ।
क्षालितं वस्त्रमादाय प्राप्तः शङ्करसन्निधिम् ॥ १८२ ॥

तुङ्गाभङ्गसमैः पद्यैर्निरर्गलविनिर्गतैः ।
सर्वशास्त्रार्थगम्भीरैः कीर्तयन् ब्रह्म शाश्वतम् ॥ १८३ ॥

सुभगैस्तोटकैर्वृत्तैर्ललिताक्षरगुम्फितैः ।
प्रशंसन् गुरुकारुण्यं धन्यतामात्मनो ब्रुवन् ॥ १८४ ॥

रममाणः परानन्दे क्रममाणः शनैः शनैः ।
ईक्षमाणो गुरुं भक्त्या ववन्दे तं दयानिधिम् ॥ १८५ ॥

तदद्भुतमसम्भाव्यं गिरेः कर्म विनूतनम् ।
सतीर्थ्या वीक्ष्य ते सर्वे बभूवुर्मूकविस्मिताः ॥ १८६ ॥

सम्प्रीतस्तोटकैर्वृत्तैः श्रीमच्छङ्करदेशिकः ।
आजुहाव प्रियं शिष्यं तोटकेत्याख्यया गिरिम् ॥ १८७ ॥

पद्मपादादयः शिष्या आचार्यप्रेरिता बुधाः ।
प्रणिन्युः कांश्चन ग्रन्थान् वेदान्तार्थप्रकाशकान् ॥ १८८ ॥

तैत्तिरीयस्य भाष्यस्य बृहदारण्यकस्य च ।
प्रशस्तं वार्तिकं चक्रे पण्डितेन्द्रः सुरेश्वरः ॥ १८९ ॥

तथा नैष्कर्म्यसिद्धिं च तत्प्रणीतां यतीश्वरः ।
जहर्ष वीक्ष्य विद्वद्भिर्लालनीयां स्वमूर्धसु ॥ १९० ॥

ततः श्रीभगवत्पादो जनन्या अन्तिमां दशाम् ।
दिव्येन चक्षुषा ज्ञात्वा प्रतस्थे कालटिं द्रुतम् ॥ १९१ ॥

आर्याम्बा वयसा जीर्णा मृत्युशय्यामधिश्रिता ।
आनन्दाश्रु विमुञ्चन्ती प्रियपुत्रमवैक्षत ॥ १९२ ॥

आचार्यो जननीहस्ते न्यस्य हस्तं क्षणं स्थितः ।
किञ्चित् सम्भाष्य सा देहं व्यसृजत् कर्मसङ्क्षयात् ॥ १९३ ॥

अदृष्ट्वा कमपि प्राप्तं दायादं शङ्करो यतिः ।
मात्रानुभूतकष्टान्यप्यनुचिन्त्य शुशोच सः ॥ १९४ ॥

जनन्या अन्त्यसंस्कारं कर्तुं तेनार्थिता अपि ।
अङ्गीचक्रुर्न दायादा विवेकविधुराः समे ॥ १९५ ॥

गत्यभावात्तु संस्कारं स्वयं कर्तुमियेष सः ।
अग्निमप्यददुर्नामी अहो मौर्ख्यमयन्त्रितम् ॥ १९६ ॥

पाणिन्धमोऽग्निमुत्पाद्य क्रोधाद्योगीश्वरो गुरुः ।
ददाह जननीदेहं विधिवन्मन्त्रपूर्वकम् ॥ १९७ ॥

शशाप मुनिरुद्विग्नो ग्रामस्थान् ब्राह्मणब्रुवान् ।
श्रौतकर्माण्यकुर्वाणा वेदबाह्या भविष्यथ ॥ १९८ ॥

अथ निष्क्रम्य योगीन्द्रो ग्रामात् केरलभूमिषु ।
विजहारैकको ब्रह्म ध्यायन् शिष्यनिरीक्षया ॥ १९९ ॥

सुरेश्वरः पद्मपादो हस्तामलकतोटकौ ।
चत्वार इव वेदास्ते तुष्टुवुः प्राप्य शङ्करम् ॥ २०० ॥

वेदाङ्गोपाङ्गसदृशाः यतिनोऽन्ये तपस्विनः ।
अन्विष्यन्तः समाजग्मुः सेवितुं तं जगद्गुरुम् ॥ २०१ ॥

आज्ञां च स्वगुरोर्मत्वा प्राप्तकालां यतीश्वरः ।
प्रतस्थे वैदिकं धर्मं प्रतिष्ठापयितुं पुनः ॥ २०२ ॥

आदौ रामेश्वरं गत्वा स्तुत्वा विद्येश्वरं शिवम् ।
पूर्वं केनाप्यनारब्धं कर्म प्रारभतात्मवान् ॥ २०३ ॥

केरलं चाथ गोकर्णं कर्णाटं द्राविडं तथा ।
जित्वान्ध्रं च महाराष्ट्रं प्रविवेश स घूर्जरम् ॥ २०४ ॥

दक्षिणाहि हिमाद्रेरप्युत्तराहि च वारिधेः ।
सर्वदेशान् प्रविश्यासौ जिगाय प्रतिवादिनः ॥ २०५ ॥

चार्वाकान् बौद्धजैनांश्च साङ्ख्यान् वैशेषिकांस्तथा ।
योगिनो जैमिनीयांश्च पराजिग्ये जगद्गुरुः ॥ २०६ ॥

सर्वत्र जनतां दृष्ट्वा गुरुर्ललितया गिरा ।
प्रोवाच सुखबोधार्थं सर्वेषां हितकाम्यया ॥ २०७ ॥

नाहं प्रवर्तये नूत्नं धर्मं स्वेन प्रकल्पितम् ।
ऋषिभिर्दर्शितो मार्गो ज्ञाप्यतेऽद्य पुरातनैः ॥ २०८ ॥

वेदाः प्रमाणं सर्वस्य श्रेयःप्रेयोऽनुगामिनः ।
इहामुत्र सुखं तस्य विनिपातो न जातुचित् ॥ २०९ ॥

एकं ब्रह्म परं सत्यं द्वितीयं नास्ति किञ्चन ।
हरिः शक्तिः शिवश्चेति ब्रह्मणो रूपकल्पना ॥ २१० ॥

अनुमोदामहे सर्वं मतमास्तिक्यभूषितम् ।
न किञ्चित् प्रतिषेधामः सर्वोऽप्यात्मेति हेतुना ॥ २११ ॥

कर्म चोपासना भक्तिस्त्रयं परमपावनम् ।
इष्यते चित्तशुध्यर्थं ततो ज्ञानं प्रजायते ॥ २१२ ॥

विद्यायामधिकारोऽस्ति सर्वेषां नात्र संशयः ।
धर्मशास्त्रानुसारेण प्राप्तिमार्गस्तु भिद्यते ॥ २१३ ॥

परमार्थेऽपि चाद्वैते संसारो द्वैतपूर्वकः ।
चातुर्वर्ण्यं ततो रक्ष्यं व्यवहारानुवर्तिना ॥ २१४ ॥

सम्प्रदायविदाचार्यैः रक्षितं परमं धनम् ।
विनियुञ्जे सुखार्थं वो मदीयं नास्ति किञ्चन ॥ २१५ ॥

इत्यादि वचनैर्वाग्मी वशीकृत्याखिलं जगत् ।
वैदिकं स्थापयामास स्वधर्मं किमितोऽद्भुतम् ॥ २१६ ॥

पञ्चायतनपूजां च प्रावर्तयत स प्रभुः ।
कर्मिणामीश्वरैकत्वं बोधयन् भेददर्शिनाम् ॥ २१७ ॥

इत्थं स भारते राष्ट्रे चरणाभ्यामनारतम् ।
चरित्वा वैदिकं धर्मं स्थापयामास सुस्थिरम् ॥ २१८ ॥

बहून् प्रकरणग्रन्थान् प्रणिनाय महामनाः ।
सुखबोधाय शास्त्रस्य तत्त्वं विज्ञातुमिच्छताम् ॥ २१९ ॥

भक्तितत्त्वप्रधानानि स्तोत्राणि च कवीश्वरः ।
गुणालङ्कारशोभीनि श्रव्यैर्ग्रथितवान् पदैः ॥ २२० ॥

ततः काश्मीरकान् गत्वा पराजित्याखिलान् बुधान् ।
सर्वज्ञपीठमारूढः सर्वज्ञः शुशुभेतराम् ॥ २२१ ॥

अथ शिष्यान् समुद्दिश्य प्रोवाच शुभदर्शनः ।
गुरुभिर्मे यदाज्ञप्तं तत्सर्वं साध्वनुष्ठितम् ॥ २२२ ॥

अयं च वैदिको धर्मो भारते तिष्ठतु स्थिरम् ।
इत्याशयेन वः किञ्चिदनुशास्मि शुभव्रताः ॥ २२३ ॥

प्राङ्गया शारदापीठं शृङ्गेर्यां स्थापितं खलु ।
सुरेश्वरः परं कार्यं तदधिष्ठाय निर्वहेत् ॥ २२४ ॥

द्वारकायां बदर्याञ्च जगन्नाथपुरे तथा ।
स्थापनीया मठा एवं भारते दिक्चतुष्टये ॥ २२५ ॥

पद्मपादस्तोटकश्च हस्तामलक इत्यमी ।
त्रिमूर्तय इवैतेषु प्रकाशन्तां यथाक्रमम् ॥ २२६ ॥

यथार्हमेवमन्यत्र व्याख्यानाध्यापनादिभिः ।
वेदानां रक्षणे भूयः प्रयतध्वं सदध्वनि ॥ २२७ ॥

सम्प्रदायः सदा पाल्यो गुरुशिष्यक्रमागतः ।
रमध्वमद्वये सच्चिदानन्दे परमात्मनि ॥ २२८ ॥

शुद्धचित्तैश्च युष्माभिर्बहुधा सेवितोऽस्म्यहम् ।
मङ्गलं कुरुताद्देवः सर्वेषां प्रभुरद्वयः ॥ २२९ ॥

अभिधायेत्थमाचार्यो विससर्जाखिलान् यतीन् ।
बाष्पपूर्णमुखाः शिष्या निर्जग्मुर्गुरुशासनात् ॥ २३० ॥

अथ श्रीशङ्कराचार्यो बदरीं प्राप्य कानिचित् ।
दिनानि न्यवसत्तत्र ध्यायन् नारायणं विभुम् ॥ २३१ ॥

ततः केदारमाचार्यः प्रययौ स यदृच्छया ।
ब्रह्मादिदेवतायाच्ञां सम्मान्य स गुरूत्तमः ॥ २३२ ॥

परं समाधिमास्थाय ब्रह्मनिर्विष्टमानसः ।
देहं विसृज्य भगवान् स्वस्वरूपे व्यवस्थितः ॥ २३३ ॥

चरित्रमेतत् प्रथितं जगद्गुरोः वहित्रमाढ्यं तरतां भवाम्बुधिम् ।
पवित्रमन्त्रं जनचित्तशोधकं पठन्नवाप्नोति शमादिसम्पदम् ॥ २३४ ॥

नमस्ते शङ्कराचार्यभगवत्पादमूर्तये ।
दिगन्ताक्रान्तशुभ्रश्रीचन्द्रिकास्वच्छकीर्तये ॥ २३५ ॥

नमोऽस्तु गुरवे तुभ्यं येन वेदाः सुरक्षिताः ।
येन भारतदेशोऽयमेकराष्ट्रीकृतः स्वयम् ॥ २३६ ॥

सौख्याय सर्वमर्त्यानां सर्वधर्मसमन्वयः ।
यद्बोधाज्जायते तस्मै नमस्तेऽस्तु जगद्गुरो ॥ २३७ ॥

नमः श्रीगुरवे तुभ्यं यदीयग्रन्थसौरभम् ।
भृशमाघ्राय मोदन्ते विद्वांसो विश्ववर्तिनः ॥ २३८ ॥

द्वात्रिंशवत्सरादर्वागीदृक् ते कृतिवैभवम् ।
सर्वज्ञः शङ्करोऽसि त्वां नमस्कुर्मो यथाबलम् ॥ २३९ ॥

रङ्गनाथाभिधः कश्चित् पीत्वा गुरुकथामृतम् ।
आचार्यचर्यामाश्चर्यामक्षय्यां तन्मना जगौ ॥ २४० ॥

- ओं तत् सत् -



*Mahamahopadhyaya*
N. Ranganatha Sharma

*Born in 1916 at Nadahalli village, Shivamogga Dist. Karnataka, Vidwan N. Ranganatha Sharma has authored about eighty books in Sanskrit and in Kannada. His writings include independent works, translations, commentaries and expositions. His pen is equally felicitous both in kāvya and śāstra. He is honoured by institutions and individuals including Govt. organizations for his eminence as a scholar, writer and a great teacher.*

VAGARTHA

**Price : Rs.125/-**